तत्र--"कट्वम्ललवणं पित्तं स्वाद्वम्ललवणः कफः॥
कषायतिक्तकटुको वायुर्दृष्टोऽनुमानतः।
पित्तमुष्णं लघु स्निग्धं तीक्ष्णं वायुर्हिमो लघुः॥
रूक्षस्तीक्ष्णः कफः शीतो गुरुः स्निग्धो मृदुर्मतः।
कफपित्तानिलाः पाके स्वाद्वम्लकटुकाः क्रमात्।"

इति दोषाणां रसवीर्यविपाकाः। तस्माद्यद्वातलं तद्वातेन रसवीर्यविपाकैः समानं यद्वा-तघ्नं तद्विपरीतमिति निर्णतुं शक्यम्॥

ननु "यस्माद्दृष्टो यवः स्वादुर्गुरुरप्यनिलप्रदः॥
दीपनं शीतमप्याज्यं वसोष्णाप्यग्निसादनी।
कटुर्विपाके पित्ताघ्नो मुद्गो माषस्तु पित्तलः॥
स्वादुपाकोऽपि चलकृत् स्निग्धोष्णं गुरु फाणितम्।
रसे स्वादौ यथा तद्वत्ततोऽन्येष्वपि दृश्यते॥
वातलं कफपित्ताघ्नमम्लमप्याक्षकीफलम्[1]।
कुरुते दधि गुर्वेव वर्हिं पारेवतं न तु॥
कपित्थं दाडिमं चाम्लं ग्राहि नामलकीफलम्।
कषाया ग्राहिणी शीता धातकी न हरीतकी॥
दन्ती रसाद्यैस्तुल्यापि चित्रकस्य विरेचनी।
मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनम्॥
कटुपाकरसः स्निग्धगुरुत्वैः कफवातजित्।
लशुनो वातकफकृन्न च तैरेव यद्गुणैः।
मिथो विरुद्धान् वातादीन् लोहिताद्या जयन्ति यत्।
कुर्वन्ति यवकाद्याश्च तत्प्रभावविजृम्भितम्॥

१. आक्षकं फलम[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रसेन वीर्येण गुणैश्च कर्म,
द्रव्यं विपाकेन च यद्विदध्यात्।
सद्योऽन्यथा तत्कुरुते प्रभावा-
द्धेतोरतस्तत्र न गोचरोऽस्ति ॥"

इत्यष्टाङ्गसङ्ग्रहोक्तरीत्या व्यभिचारदर्शनादसदनुमानमिति चेत्, अन्यत्रापि तुल्यं तत्र द्रव्यशक्तिः। शब्दोपात्ता नेति चेत्, अत्रापि रसादयः शब्दोपात्ताः। स्वाद्वम्लं नारंगम्, स्वादु पालेवतं, अम्लं लकुचमित्यादिव्यावर्त्तकत्वेनोपादानान्न प्रतिज्ञाहानिः। न सर्वेषां न सर्वत्रेति चेत्, तत्रापि समानं, किंचित्तुल्येऽप्यसमग्राभिधानेऽनुमानैकान्तिकत्वे वाऽन्यत्र ग्रन्थे यदर्थप्रयासः सा द्रव्यशक्तिरेव निर्णीता रसादयस्तत्प्रापकास्तत्र का क्षतिरित्यलमतिवादेन। एतेन दीपनत्वाद्यनुक्तिदोषोऽपि निरस्त इति ॥ ३ ॥

ये यत्रोक्ता[1] गुणाः द्रव्ये ते तस्यावयवेष्वपि।
भेदेष्वपि विकारेष्वप्यपवादादृते[2] मताः ॥ ४ ॥

प्र०—इह वक्ष्यमाणगुणाः प्रसिद्धा अविकृतावयविमात्रपर्यवसायिनो मा भूवन्नित्यतिदेशं करोति।

यत्र द्रव्ये मोदक्यादौ ये गुणा वातघ्नत्वादयः उक्तास्ते न केवलं तस्मिन्नवयविनि समस्त उपयुक्ते[3] भवन्ति अपितु तस्यावयवेष्वपि मूलत्वक्पत्रपुष्पफलादिष्वपि। तथा न केवलं प्रथमप्रतीते द्राक्प्रसिद्धे वा तस्मिन्नपितु तस्य भेदेष्वणुमहद्दीर्घह्रस्वश्वेतरक्तपीतपुष्पादिष्वपि; तथा न केवलं तस्मिन्नविकृतेऽपितु तस्य विकारेषु स्नेह-लेह-क्वाथ-कल्कादिष्वपि ते गुणा अपवादादृते मताः। अपवादो बाधकः, स चात्रोपदिश्यते। न ह्यतिदेशेन बाध्यते ॥ यथा कफघ्न्या अपि बदर्याः फलं वातघ्नपित्तश्लेष्मलेषूपदेशान्न कफघ्नम्। वातघ्नश्लेष्मलपित्तोदासीनस्यापि पलाण्डोः भेदः क्षीरपलाण्डुः वातपित्तघ्नश्लेष्मलेषूपदेशान्न पित्तोदासीनः, वातपित्तघ्नश्लेष्मलस्यापीक्षुरसस्य विकारः सितोपला वातपित्तघ्नश्लेष्मोदासीनेषूपदेशान्न श्लेष्मला। एवं सत्यप्यवयवावयविनोस्तालफलतालवृक्षयोः वातपित्तघ्नश्लेष्मलेषु सामान्यविशेषयोः काञ्जिकसौवीरयोः कफवातघ्नपित्तलेषु प्रकृतिविकारयोः सूप्याऽसूप्यभक्ष्ययोः कफपित्तघ्नवातलेषु यद्वचनं

१. यस्यो[3] २. षु तेऽप[3] ३. उक्ता[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तदितरेभ्योऽवयवविशेषविकारेभ्योऽतिशयार्थम्। एवं सर्वत्र न्यायसिद्धिः ॥ ४ ॥

इह परस्परविरुद्धानां चरकादिवाक्यानां तट्टीकाकारहरिश्चन्द्रादिकृतामेकवाक्यतां[1] विचार्य निर्णीतो द्रव्यगुण उक्त इत्याह—

वातलं चरको ब्रूते वातघ्नं वष्टि सुश्रुतः ।
खारणादिर्नदत्यन्यदित्युक्तेरत्र निर्णयः ॥ ५ ॥

प्र०—क्वचिच्चरकोक्तादन्यत् क्वापि सुश्रुतोक्तात् क्वचिदुभाभ्याम्। अन्यच्छब्दो विपरीतवाची। चरकसुश्रुतयोश्चरकखारणाद्योः सुश्रुतखारणाद्योश्चरकसुश्रुतखारणादीनां च परस्परविरुद्धानां द्रव्यशक्तिविषयाणामुक्तीनामत्र ग्रंथे निर्णयो निर्णीतार्थकथनम् न तु यथास्थितिमतानुवाद इत्यर्थः। यथा चरकेण मधु वातलमुक्तम् "वातलं गुरु शीतञ्च रक्तपित्तकफावहम्। संधातच्छेदनं रूक्षं कषायं मधुरं मधु ॥" इति। सुश्रुतेन तु वातघ्नमुक्तम् "मधु तु मधुरं कषायानुरसं शीतलं रूक्षमग्निदीपनं वर्ण्यं स्वर्यं लघु सुकुमारं लेखनं हृद्यं वाजीकरणं संधानं रोपणं चक्षुष्यं प्रसादनं सूक्ष्ममार्गानुसारिपित्तश्लेष्ममेदोमेहहिक्काश्वासातीसारछर्दितृष्णामूर्छाविषप्रशमनं प्रह्लादि त्रिदोषशमनञ्च। तत्तु लघुत्वात् कफघ्नं पैच्छिल्यान्माधुर्यात्कषायभावाच्च वातपित्तघ्नमिति" ॥ तच्चात्र ग्रंथे कफपित्तघ्नवातोदासीनमध्ये पठितम्।

ननु मधुनो वातोदासीनत्वे किं मूलं? परस्परविरोधपरिहारेण व्याख्यायमाने चरकसुश्रुतवाक्ये एव वातोदासीनत्वे ह्यंगीक्रियमाणे तत्तदुपाधिवशाद्वातलत्ववातघ्नत्वे मधुन्युपपद्येते। तेन विषयभेदाच्चरकसुश्रुतवाक्ये न विरुध्येते ॥ वातलत्वे ह्यंगीक्रियमाणे वातघ्नोपहितस्य परस्परशक्तिप्रतिबन्धा[2]द्वातोदासीनत्वमेव स्यान्नतु वातघ्नत्वं ततश्च सुश्रुतवाक्येन सह विरोधस्तदवस्थ एव। वातलत्वाभिभवाद् वातघ्नत्वं स्यादिति चेन्न, अभिभवे प्रमाणाभावात्। सुश्रुतोक्तवातघ्नत्वान्यथानुपपत्तिरेव प्रमाणमिति चेन्न, औदासीन्यस्य शमनत्वकोपनत्वाभावरूपत्वेनाप्रतिबन्धकत्वात् तस्योक्तरीत्याप्युपपत्तेः। उक्तरीतावपि वातोदासीनत्वाभिभवांगीकारान्न विशेष इति-

१. मेकान्वयतां[२]

१. बन्धाद्धेतोः[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

चेन्न; औदासीन्यस्य शमनत्वकोपनत्वाभावरूपत्वेनाप्रतिबन्धकत्वाद्, दृश्यते चाभावमुखेन तत्र तत्र तस्योक्तिः। यथा पलाण्डुः कफं करोति नो पित्तमिति, तैलं कफकृन्नेत्यादि। तेन वातोदासीने मधुनि निःप्रतिबन्ध उपाधिव्यापारो वातले तु सप्रतिबन्ध इति महान् विशेषः। निःप्रतिबन्ध उपाधिव्यापारे वातलोपहितस्य मधुनो वातलत्वे न्यायसिद्धे वचनवैयर्थ्यमिति चेन्न, असिद्धे[1] ह्यौदासीन्ये न्यायप्रवृत्तिरिति इह त्वस्मादेव[2] वचनान्न्यायसहकृतादौदासीन्यसिद्धिः। किञ्च वातलत्ववद् वातघ्नत्वमप्यङ्गीकर्तुं शक्यमित्येष निर्णय एव ॥ तस्माच्छुद्धं मधु वातोदासीनमित्यभिहितम्। तत्तूपाधिभेदाद्वातलं वातघ्नञ्चेत्युचितम्। उपाधयश्च मात्रादयः। तथा चाष्टांगसंग्रहे—

मात्रायोगक्रियादेशकालावस्थादिभेदतः ।
ततस्ततो यतो दृष्टास्ते ते भावास्तथा तथा॥ इति ॥

न च मात्रादेशकालावस्थावियुक्तस्य द्रव्यस्यासंभवाच्छुद्धगुणोक्तिरनुपयुक्ता, शुद्धगुणानुसारेण ह्युपाधिकृतो विशेषः। यथा हीनमात्रया तिक्तादिभिर्वा युक्तं कुल्माषादिना वा संस्कृतं जाङ्गले वा देशे वृद्धे वा देहे वर्षासु वा काले जीर्णतायां वाप्यवस्थायामुपयुक्तं वातोदासीनं न वातलं न वा वातं हन्ति। उपाध्यन्तरसहकृतं तु हन्ति। एवमन्यत्राप्यूह्यम्। तस्मात्समूलमेव मधुनो वातोदासीनत्वम्। अत एव क्षारणादिनापि न वातलं नापि वातघ्नं प्रोक्तम्, तद्वाक्यं हि—

"कषायानुरसं रूक्षं शीतं स्वादु गुणाधिकम्।
लेखनं भग्नसंधातृच्छेदनं विशदं गुरु ॥
दाहतृष्णाविषच्छर्दिरक्तपित्तकफापहम् ॥
संग्राहि प्रवरं वृष्यं माक्षिकं प्रवरं मधु॥" इति ॥

यत्तु सुश्रुतवाक्ये त्रिदोषशमनं वातपित्तघ्नमिति च वायोः सह निर्देशात्पित्तश्लेष्ममेदोमेहेति कफपित्तयोः पृथङ् निर्देशात्संसृष्टवातविषयं चरकवाक्यमित्याहुः ते न सुश्रुताचार्याभिप्रायं विदुः। यो ह्ययं त्रिदोषशमनमिति सह निर्देशः स लाघवार्थः यस्तु वातपित्तघ्नमिति च स माधुर्यस्य हेतोर्मध्ये पठितस्योभयप्रयोजनार्थः पैच्छिल्यान्माधुर्याच्च क्रमाद्वातपित्तघ्नमिति माधुर्यात् कषायभावाच्च क्रमाद् वात-

---

१. अन्यतः सिद्धे[2]
२. तु तस्मादेव[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पित्तघ्नमिति **जैज्झटो**ऽप्याह योजनार्थः। माधुर्यात् पैच्छिल्यात् सौकुमार्याद्वातघ्नं, लघुत्वात्कषायभावाच्च कफघ्नं माधुर्यशैत्यादिभिः पित्तहरमिति त्रिदोषशमनम्[1]। द्रव्यप्रभावाच्च, द्रव्ये परतंत्रा हि प्रभाववशवर्तिनो गुणा इत्यादि ॥ यस्तु कफपित्तयोः पृथङ्निर्देशः स मेहादिविशेषणार्थः। कफपित्तजानेव मेहादीन् हन्ति न वातजानिति हेतुप्रत्यनीकत्वादन्यदेव व्याधिप्रत्यनीकत्वमिति। वातघ्नत्वेऽपि न वातजमेहादिघ्नत्वम्। किञ्च योगवाही वायुरिति कफपित्तघ्नत्वादेव संसृष्टवातघ्नत्वे सिद्धेऽस्य तत्परत्वे वचनवैयर्थ्यम्। उपपद्यते हि तत्र तत्र योगवाहित्वं वायोः

"ग्रैष्मः प्रायो मरुत्पित्ते वासन्तः कफमारुते।
मारुतो योगवाहित्वात्कफपित्ते तु शारदः।
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत्॥
दाहः पित्तयुत" इत्यादि॥

यत्तु क्षौद्रादीनां वातलत्वं दृष्ट्वा तद्विषयं **चरक**वाक्यमितरविषयं **सुश्रुत**वाक्य मित्याहुः ते हि शास्त्रतत्त्वं न विदुः न ह्येते मधुसामान्यस्य गुणाः किन्तु माक्षिकाख्यस्य मधुविशेषस्य **खारणादिना** स्पष्टीकृतत्वात्, सामान्यविशेषेणोपसंहारात्। तस्मात्पूर्वैव विषयव्यवस्था। एतेन गौरवलाघवविरोधोऽपि निरस्तः। तथा च **चरकेण** वेत्राग्रं वातलेषु पठितम्—

"मण्डूकपर्णी वेत्राग्रं कुचैला वनतिक्तकम्।
कर्कोटकावल्गुजकौ पटोलं शकुलादनी॥
वृषपत्राणि शार्ङ्गेष्टा केवुकं सकठिल्लकम्॥
नाडीकलायं गोजिह्वा वार्त्ताकं तिलपर्णिका।
कुलकं कर्कशश्चैव शाकं पर्पटकं तथा॥
कफपित्तहरं तिक्तं वातलं कटु पच्यते॥" इति
"**खारणादिना** त्रिदोषघ्नेषु पठितम्—
चञ्चुर्मर्सरिका पाठा वेत्राग्रं सुनिषण्णकम्।
पत्रशाकं च संग्राहि दोषत्रयहितं लघु॥" इति

तदप्यत्र मधुवन्निर्णीयं पठितम्। अत एव सुश्रुतेन कफपित्तघ्नमेवोक्तम्।

१. त्रिदोषहरं[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"आटरूषकवेत्राग्रगुडूचीनिम्बपर्पटाः ।
किराततिक्तसहितास्तिक्ताः पित्तकफापहाः ॥ इति ॥

हरिश्चन्द्रोऽप्याह[1]—सर्वं तिक्तं वातलमवृष्यमन्यत्र वेत्राग्रपटोलयोरिति। तथा **सुश्रुते** वेणुपर्ण्यादीनि तृणधान्यानि पित्तलान्युक्तानि—"कोरदूषनीवारश्यामाकशान्तनुवरकोद्दालप्रियङ्गुमधूलिकानन्दीमुखी कुरुविन्दकगवेधुकशरवरुकतोदपर्णीमुकुन्दवेणुपत्रप्रभृतयस्तृणधान्यविशेषाः ।

उष्णाः कषाया मधुरा रूक्षा कटुविपाकिनः ।
श्लेष्मघ्ना बहुनिष्यन्दा वातपित्तप्रकोपनाः ॥ इति

खारणादिना पित्तघ्नान्युक्तानि—

श्यामाकहस्तिश्यामाकनीवाराणुप्रियङ्गवः ।
गवेधुकातोदपर्णीनाडीगर्मुटिकोद्रवाः ॥
प्रशातिकाम्भःश्यामाकलौहित्याः कोरदूषकाः ।
वरका घूर्णपाद्यश्च[2] कुम्भीकाः समुकुन्दकाः ॥
कषायमधुरा रूक्षा रक्तपित्तकफापहाः ।
अवृष्या लघवः शीताः क्लेदघ्ना वातकोपनाः ॥ इति

तान्यप्यत्र मधुवन्निर्णीय कफघ्नवातलपित्तोदासीनान्युक्तानि । अत एव **चरकेन** कोरदूषश्यामाकौ पृथगुक्त्वा तत्सदृशान्युक्तानि—

"सकोरदूषः श्यामाकः कषायो मधुरो लघुः ।
वातलः कफपित्तघ्नः शीतः संग्राहिशोषणः ॥
हस्तिश्यामाकनीवारतोदपर्णीगवेधुकाः ।
प्रशातिकाम्भःश्यामाकलौहित्याणुप्रियङ्गवः ॥
मुकुन्दझिण्टीगर्मुटीवरुकाः कारकास्तथा ।
शिबिरोत्कटजूर्णाह्वाःश्यामाकसदृशाः गुणैः" ॥ इति

सदृशगुणत्वान्न्यूनगुणत्वमुपपन्नमुपमेयं ह्युपमानतोऽपकृष्टं भवति । तेन श्यामाकः पित्तं हन्ति हस्तिश्यामाकादयस्तु हन्तुमसमर्था इत्यर्थः । कफवातयोरप्येवं प्रसंग इति चेन्न, **तन्त्रान्तरे** वातलत्वकफघ्नत्वयोरुपदेशात् । उपदेशो ह्यतिदेशाद्बली । एतेनौष्ण्यशैत्यविरोधोऽप्यपास्तः । तथा च **चरकेन** पटोलफलं वातलमुक्तं मण्डूकपर्णीत्यादि । **सुश्रुतेन** वातोदासीनमुक्तम्—

१. हरिश्चन्द्रो हारितोऽप्याह[1]   २. घूर्णपादाश्च[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"कफपित्तहरं व्रण्यमुष्णं तिक्तमवातलम् ।
पटोलं कटुकं पाके वृष्यं रोचनदीपनम्[1] ॥" इति ॥

खारणादिना तु वातघ्नमुक्तम्—

"सस्नेहोष्णं लघु स्वादु पाके दोषानुलोमनम् ।
उष्णं तिक्तं त्रिदोषघ्नं शाकं निम्बपटोलयोः ॥" इति
"पटोलनिम्बं वातघ्नं तिक्तमन्यत्र वातलम् ॥" इति

तच्चात्र **खारणादि**मतमंगीकृत्य त्रिदोषघ्नेषु पठितम् । चरकोक्तस्य हि वातलमित्यस्य कुचैलादिभिरन्वयेन सार्थक्यम् । पटोलस्य च कफपित्तहरादिभिः । अत एव **हरिश्चन्द्रजैज्झटाद**य[2]ष्टीकाकारा अपोद्धृत्य व्यक्तिव्यतिरेकेण गुणानाहुः । **सुश्रुतोक्तस्या**वातलमिति शब्दस्य वातघ्नमित्यर्थो विरुद्धार्थत्वात्, तत्र यद्यपि वातोदासीनत्व-वातघ्नत्वयोः सहानवस्थानलक्षणविरोधोऽस्त्येव, तथापि तन्त्रान्तर विरोधभयात्तन्नात्र व्याख्येयम् । अथवा अवातलशब्देन वातलकरणाभाव उच्यते । स च वातघ्नेऽप्यस्तीत्यविरोधः । अत एवाह **वाग्भटः**—

"तिक्तं कटु च भूयिष्ठमवृष्यं वातकोपनम् ।
ऋतेऽमृतापटोलाभ्यां शुण्ठीकृष्णारसोनतः" ॥ इति

माधवकारोऽपि[3]—

"पटोलपत्रं पित्तघ्नं वल्ली तस्य कफापहा ।
फलं त्रिदोषशमनं मूलं चास्य विरेचनम्" ॥ इति

कटुस्वादुपाकयोस्तु रसवदविरोधः । एवमन्येऽपि विरोधाः शास्त्रसहितेन तर्केण परिहरणीयाः[4] । **चरका**दीनां त्रयाणामेवोपादानं तत्प्रणीतानां तन्त्राणां प्रमाणत्वात् सम्पूर्णत्वादविच्छिन्नसम्प्रदायत्वादभियुक्तैर्व्याख्यातत्वाच्च । अत एव तद्विरुद्धानामन्येषामप्रमाण्यमेव । यथा "फलं तु पित्तलं तालं सरमिति" **वाग्भट**वाक्यस्य "फलं स्वादु रसे तेषां तालजं गुरु पित्तहृदि"ति **सुश्रुत**वाक्यविरोधात् । न चान्यन्मूलम् ॥ **खारणादयो**ऽप्याहुः—

१. दीपनपाचनम्[2]
२. जैर्जटायः[1]
३. माधवोऽपि[1]
४. परिहर्त्तव्याः[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"पनसं नारिकेलञ्च तालसस्यञ्च तर्पणम् ।
स्वादु शीतं गुरु स्निग्धं बृंहणं कफशुक्रलम् ॥ इति ॥

चरकोऽपि —

तालसस्यानि सिद्धानि नालिकेरफलानि च ।
बृंहणस्निग्धशीतानि बल्यानि मधुराणि च ॥ इति ॥

एतद् विवरणे **बाष्पचन्द्रो**ऽपि—

"तालसस्यानि तालफलानि, सिद्धानि पक्वानि मधुरस्निग्ध-शीतत्वेन वातपित्तहरत्वे कफकृत्त्वंञ्च मन्तव्यमिति ।" किञ्च रस-मित्यत्र सरमिति, हृदित्यत्र कृदित्यन्यथा गृहीतं **सुश्रुत**वाक्यमेवात्र मूलं संभाव्यते । अत एवात्र तालफलं वातपित्तघ्नश्लेष्मलेषु पठितमिति ॥५॥

वातघ्नमेव यद्द्रव्यं तद्वातं हन्ति केवलम् ।
सान्यं च केवलावन्यौ न हन्ति न करोति च ॥ ६ ॥
वातघ्नमन्यजननं द्रव्यं यद्धन्ति तच्चलम् ।
केवलं केवलौ सान्यावन्यो वर्धयते मलौ ॥ ७ ॥
वातघ्नमन्योदासीनं यत्तच्छुद्धानिलापहम् ।
शुद्धौ सान्यौ न हन्त्यन्यौ न करोतीति सर्वतः ॥ ८ ॥

प्र०—अथ वातघ्नादिसप्तपंचाशद्भेदान् व्यनक्ति । एवकारेण पित्तादिव्युदासः । अन्यशब्देन पित्तकफौ व्यस्तौ समस्तौ च । चलो वायुः, शुद्धः केवलः । तत्र यत्केवलं, सपित्तं, सकफं, सपित्तकफं वा वातं हन्ति, केवलं पित्तं कफं पित्तकफौ वा न हन्ति नापि करोति तद्वा-तघ्नम् । यत्केवलं वातं हन्ति केवलं सवातं वा पित्तं करोति तद्वातघ्न-पित्तघ्नम् । एवं वातघ्नश्लेष्मलं वातघ्न-पित्तश्लेष्मलञ्च । यत्केवलं वातं हन्ति केवलं सवातं वा पित्तं न हन्ति न करोति तद् वातघ्न-पित्तोदासीनम् । एवं वातघ्न-श्लेष्मोदासीनं वातघ्न-पित्तघ्न-श्लेष्मोदा-सीनञ्च । एवं नव वातघ्नभेदाः । एवं पित्तघ्नश्लेष्मघ्नयोः[1] । वात-पित्तघ्नं, वातपित्तघ्नश्लेष्मलं, वातपित्तष्मोदासीनञ्चेति त्रयो वात-पित्तघ्नभेदाः । एवं वातश्लेष्मघ्न-पित्तश्लेष्मघ्नयोः दोषघ्नमेकं दोषो-दासीनमेकमेवमेकादश । सपित्तं, सकफं, सपित्तं कफं वा वातं करोति । केवलं पित्तं, कफं, पित्तकफं वा न हन्ति न करोति तद्वातलम् ।

१. पित्तश्लेष्मघ्नयोः दोषघ्नम् दोषोदासीनञ्चेति द्वौ भेदौ[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

यत्केवलं वातं करोति, केवलं सवातं वा पित्तं न करोति न हन्ति तद्वातलपित्तोदासीनम्। एवं वातलश्लेष्मोदासीनम्, वातलपित्त-श्लेष्मोदासीनम्। एवं चत्वारो वातलभेदाः। एवं पित्तलश्लेष्मलयोः। वातपित्तलं वातपित्तलश्लेष्मोदासीनञ्चेति द्वौ वातपित्तलभेदौ। एवं वातश्लेष्मलपित्तश्लेष्मलयोः दोषलमेकैकम्। एवमेते सप्तपञ्चाशद् द्रव्यभेदाः (तालिका १)। सपित्ते वाते वातप्राधान्यं वातपित्ते तूभयप्राधान्यं वाच्यमित्यसंकरः, प्राधान्यञ्चाधिकत्वस्वस्थान-त्वाविरोधत्वादिति। वातघ्नपित्तलाल्पश्लेष्मलादयस्तरतमभेदा वातघ्न-पित्तलश्लेष्मलाद्यन्तर्भूतत्वादनन्तत्वाच्च न गणिताः। यत्र द्रव्ये यो दृष्टः सः तत्रोक्त एव। यथा "वातघ्नी पित्तला चाल्पकफा चाप्याक्षिकी सुरेत्यादि। अथ प्रकरणशुद्ध्यर्थं वर्गानुद्दिशति—

> वाते पित्ते कफे वातपित्ते वातकफे क्रमात्।
> कफपित्ते त्रिषु हिता वर्गाः सप्ताहितोऽष्टमः॥ ९॥

॥ इति वर्गोद्देशः॥

त्रिषु वातपित्तकफेषु हितो, वातादिषु प्रकुपितेषु सत्सु सेव्यमानं यत् स्वास्थ्यं करोति तद्धितं द्रव्यं, तत्प्रकाशनाद्वर्गा अपि हिताः॥ एवमष्टमोऽहितः।

इत्यष्टवर्गोऽयं सिद्धमन्त्रः॥

इति वोपदेवीये सिद्धमन्त्रप्रकाशे नवश्लोकी॥

तालिका—१

सप्तपंचाशद् द्रव्यभेदाः

वातघ्नभेदाः	पित्तघ्नभेदाः
१—वातघ्नम्	१—पित्तघ्नम्
२—वातपित्तघ्नम्	२—पित्तश्लेष्मघ्नम्
३—वातश्लेष्मघ्नम्	३—पित्तवातघ्नम्
४—वातघ्नपित्तलम्	४—पित्तघ्नवातलम्
५—वातघ्नश्लेष्मलम्	५—पित्तघ्नश्लेष्मलम्
६—वातघ्नपित्तश्लेष्मलम्	६—पित्तघ्नवातश्लेष्मलम्
७—वातघ्नपित्तोदासीनम्	७—पित्तघ्नवातोदासीनम्
८—वातघ्नश्लेष्मोदासीनम्	८—पित्तघ्नश्लेष्मोदासीनम्
	९—पित्तघ्नवातश्लेष्मोदासीनम्

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वातपित्तघ्नभेदाः

१—वातपित्तघ्नम्
२—वातपित्तघ्नश्लेष्मलम्
३—वातपित्तघ्नश्लेष्मोदासीनम्

वातश्लेष्मघ्नभेदाः

१—वातश्लेष्मघ्नम्
२—वातश्लेष्मघ्नपित्तलम्
३—वातश्लेष्मघ्नपित्तोदासीनम्

पित्तश्लेष्मघ्नम्

१—पित्तश्लेष्मघ्नम्
२—पित्तलश्लेष्मघ्नवातलम्
३—पित्तलश्लेष्मघ्नवातोदासीनम्

श्लेष्मघ्नभेदाः

१—श्लेष्मघ्नम्
२—श्लेष्मवातघ्नम्
३—श्लेष्मपित्तघ्नम्
४—श्लेष्मघ्नवातलम्
५—श्लेष्मघ्नपित्तलम्
६—श्लेष्मघ्नवातपित्तलम्
७—श्लेष्मघ्नवातोदासीनम्
८—श्लेष्मपित्तोदासीनम्
९—श्लेष्मघ्नवातपित्तोदासीनम्

दोषघ्नम्—१

दोषत्रयोदासीनम्—१

वातलभेदाः

१—वातलम्
२—वातलपित्तोदासीनम्
३—वातलश्लेष्मोदासीनम्
४—वातलपित्तश्लेष्मोदासीनम्

पित्तलभेदाः

१—पित्तलम्
२—पित्तलवातोदासीनम्
३—पित्तलश्लेष्मोदासीनम्
४—पित्तलवातश्लेष्मोदासीनम्

श्लेष्मलभेदाः

१—श्लेष्मलम्
२—श्लेष्मलपित्तोदासीनम्
३—श्लेष्मलवातोदासीनम्
४—श्लेष्मलवातपित्तोदासीनम्

वातपित्तलभेदौ

१—वातपित्तलम्
२—वातपित्तलश्लेष्मोदासीनम्

पित्तश्लेष्मलभेदौ

१—पित्तश्लेष्मलम्
२—पित्तश्लेष्मलवातोदासीनम्

वातश्लेष्मलभेदौ

१—वातश्लेष्मलम्
२—वातश्लेष्मलपित्तोदासीनम्

दोषलम्—१

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अथोद्देशक्रमेण वर्गानाह—

१. अथ वातघ्नवर्गः

वातघ्नं मोदकी तिन्दुः कार्पासी कोकिलाक्षकः ।
वेल्लन्तरो ग्रन्थिपर्णी मुशली स्थलपद्मिनी ॥ १० ॥
बिल्वपर्णी बिल्वपत्रमैरावत्युत्तमारणी ।
रुबोः फलञ्च स्वाद्वम्लं नारङ्गं सगुडं दधि ॥ ११ ॥
रसाला सरसं मांसं मन्थः स्नेहगुडाम्लयुक् ।

प्र०—मोदकी गुडमंजरी, तिन्दुर्वीरिका, कार्पासी आच्छादनफला, कोकिलाक्षक इक्षुरः, वेल्लन्तरो वीरतरुः, ग्रन्थिपर्णी गंधद्रव्यविशेषः, मुशली तालपत्रिका, स्थलपद्मिनी स्थलकमलिनी ॥ १० ॥

बिल्वपर्णी शाकविशेषः, बिल्वपत्रं प्रसिद्धम्, ऐरावती गोधावती, उत्तमारणी करम्भः, रुबोः फलमेरण्डबीजम्, स्वाद्वम्लं नारङ्गं मधुराम्लरसं नारङ्गफलं, सगुडं गुडमिश्रम् ॥ ११ ॥

रसाला शिखरिणी, तल्लक्षणन्तु "अर्धाढकं [२]त्वचिरपर्युषितस्य दध्नः खण्डस्य षोडशपलानि शशिप्रभस्य । सर्पिः पलं मधु पलं मरिचं द्विकर्षं, शुण्ठ्याः पलार्धमपि चार्धपलं चतुर्णाम् ॥ श्लक्ष्णे पटे ललनया मृदु[३]पाणिघृष्टा कर्पूरवाससुरभीकृतभाण्डसंस्था ।

एषा वृकोदरकृता सुरसा रसाला
यास्वादिता भगवता मधुसूदनेन[४] ॥ इत्युक्तम् ॥

सरसं मांसं रसमनुद्धृत्य पक्वं मांसं, मन्थः स्नेहगुडाम्लयुक स्नेहगुडाम्लैर्मिलितैर्युक्तो मन्थः, स्नेहो घृतादिः, अम्लो दाडिमसारादिः । मन्थः सुश्रुतोक्तः—

सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः ।
नातिद्रवा नातिसान्द्रा मन्थ इत्यभिधीयते ॥

एतत्सर्वं वातघ्नं मारुतघ्नमिति ॥

---

१. वातघ्ना[3]
२. सुचिर[2]
३. लघु[2]
४. पुरुषोत्तमेन[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वातघ्नं पित्तलं[1] भक्ष्यस्तै[2]लसिद्धोऽम्लगोरसः ॥ १२ ॥
वातघ्नं श्लेष्मलं चास्थिशृंखला शतपेरकः ।
स्वादु पारेवतं[3] वेसवारकः पृथुकस्तथा ॥ १३ ॥
भक्ष्याः फलगुडस्नेहतिलफाणितमांसजाः ।
क्षीरशाकाः किलाटो विष्यन्दपीयूषमोरणाः ॥ १४ ॥
कूची खलकाम्बलिकौ दाधिकौ मधुरं दधि ।

प्र०—भक्ष्यस्तैलसिद्धस्तैलपक्वो भक्ष्यः पूरिकादिः । अम्लगोरसोऽम्लं तक्रं एतद्द्वयं वातघ्नपित्तलम् ॥ १२ ॥

अस्थिशृङ्खला वज्रप्रोक्ता, शतपेरकः इक्षुविशेषः, स्वादु पारेवतं, तद्द्विविधं तथाहि "पारेवतं मधुरमम्लमिति द्विधा स्यात् तत्तिदुकाकृतिफलं लघु पाण्डुपुष्पम् । नीलच्छदाङ्घ्रिसहितं तु परेवताख्यं, तत्पुष्कराश्रमसमीपवने प्रसिद्धम् ॥" इत्युक्तम्। वेसवारकः सुश्रुतोक्तः—

"मांसं निरस्थि सुस्विन्नं पुनर्दृषदि पेषितम् ।
पिप्पलीशुण्ठिमरिचगुडसर्पिःसमन्वितम् ॥
एकस्थं[4] पाचितं सम्यक् वेसवार इति स्मृतः ।"

पृथुको भृष्टस्याहतस्य शाल्यादेस्तण्डुलः ॥ १३ ॥

फलजा भक्ष्याः पियालमज्जादिकृताः, गुडजा गुडगर्भाः, स्नेहजाः स्नेहपक्वा, तिलजास्तिलगर्भा, फाणितजाः फाणितगर्भाः, मांसजा मांसकृताः ।

क्षीरशाक-किलाट-पीयूष-मोरणकूच्यः क्षीरविकाराः । तत्र क्षीरशाकः प्रसिद्धः ।

"गोरसत्र्यंशसंयुक्तं क्षीरं वह्निप्रतापनात् ।
घनीभूतः किलाटः स्यात् स्मृतस्तन्मस्तु मोरणः ॥

इति किलाटो मोरणश्च । पीयूषभेदो मोरण इत्येके । अथवा "क्षीरं सद्यःप्रसूतायाः पीयूषो मलिनं घनम् । सप्तरात्रात्परं क्षीरमप्रसन्नं च मोरणम् ॥

---

१. पालेवतं २.३
२. वातघ्नःपित्तलो[3]
३. पालेवतं[2,3]
४. ऐकध्यं[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इत्युक्तम्। "दध्ना सह पयः पक्वं यत्तत्स्याद्दधिकूचिका। तक्रेण तक्रकूचीका तत् पिण्डस्तु किलाटका" ॥ इति द्विधा कूचिका। विष्यंदो घृतभृष्टास्तण्डुला इति जैज्झटः[1]। तत्कृतं पायसमित्यन्ये।

"आमं गोधूमजं चूर्णं सर्पिःक्षीरसमन्वितम्।
नातिद्रवं नातिघनं विष्यन्दो नाम नामतः ॥"

इत्यपरे। सूपशास्त्रे तु—

दधिक्षीरे समे कृत्वा त्वर्धभागावशेषिते।
आवपेद्रक्तशालीनां तण्डुलांस्तिलसंयुतान् ॥
प्रियालपनसादीनां बीजमुष्टिं समावपेत्।
क्षीरतुल्यं घृतञ्चात्र शर्करां तु महागुणाम् ॥
सिद्धं त्रिकटुकोपेतं [2]कर्पूरेणाधिवासितम्।
एष विष्यन्दनो नाम स्वर्गलोकेऽपि दुर्लभः ॥
यस्मात् पक्वेऽपि हि घृतं स्यदन्ते सर्वतो भृशम्।
तस्मात्सूपविधानज्ञैर्विष्यन्द इति संस्मृतः ॥ इत्युक्तम् ॥१४॥

दाधिकाविति खलकाम्बलिकयोर्विशेषणम् तक्रादिसिद्धव्युदासार्थम्। तत्र खलः फलानां शाकानां च निःक्वाथः। स एव तिलकल्कजः स्पष्टाम्लः काम्बलिकः।

यदाह वाग्भटः—

"पिशितेन रसस्तत्र यूषो धान्यैः खलः फलैः।
मूलैश्च तिलकल्काम्लप्रायः काम्बलिकः स्मृतः ॥" इति

मूलैरिति विशेषणं शाकोपलक्षणपरम्। यदाह चरकः—

"चाङ्गेर्याश्चुक्रिकायाश्च दुग्धिकायाश्च कारयेत्।
खलान् दधिसरोपेतान् घृतभृष्टान् ससैन्धवान् ॥" इति ॥
यत्तु—"कपित्थतक्रचाङ्गेरीमरिचाजाजिचित्रकैः।
सुपक्वः खलयूषोऽयं यूषः काम्बलिकोऽपरः ॥
दध्यम्ललवणस्नेहतिलमाषसमन्वितः" ॥ इति ॥

तत् खलयूष-काम्बलिकयूषयोस्तद्विशेषयोर्लक्षणम्। काम्बलिकोऽत्र काम्बलिकयूषः। यदाह सुश्रुतः-'दधिमस्त्वम्लसिद्धस्तु यूषः काम्बलिकः स्मृतः" इति। यच्च नलेनोक्तम्—

१. झैर्झटः[२]
२. सतिलकल्कः[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

"तिलांस्तु निस्तुषान्कृत्वा पिष्ट्वा क्षीरे त्र्यहोषितान् ।
पटे पूतान् पचेद्धीमानार्द्रकोत्थापिते घृते ॥
मरिचाजाजिसामुद्रैर्युक्तस्तिलखलो भवेत् ।
पुनः सौवर्चलाजाजीबीजपूरकसौरभैः ॥
संयोज्य मथितः स्वच्छो यूषः काम्बलिको भवेत् ।
इत्येतदपि तिलखल-तिलकाम्बलिकाख्ययोस्तद्विशेषयोरेव लक्षणम् । दधिदाडिमशाकस्नेहयुक्तं व्यञ्जनं खल इति जैज्झटोक्तिरपि विशेष एव । मधुरं स्वादुरसं दधि । एतत्सर्वं वातहरं कफकरञ्च ।

वातघ्नं पित्तकफकृन्मिश्रेया गिरिपादिका ॥ १५ ॥
फलं तु कपिच्छूरुमाणवेत्रकरञ्जजम् ।
वाताभामाभिषुकाक्षोटमुकूलकनिकोचकम् ॥ १६ ॥
अम्लं लकुचमेलानमारुकं मृगलेण्डकम् ।
द्राक्षावृक्षाम्लकोशाम्रनीपाम्रातकराम्लकम् ॥ १७ ॥
प्राचीनामलनारंगपारेवत[1]परुषकम् ।
चिञ्चाकोलानि लवणं माषातसितिलाः दधि ॥ १८ ॥
कृशरा च वसा[2] मज्जा मेदो मेषोपयः सुरा ।
पोत्रीभमहिषाः[3] मत्स्या राजीराजीवपाटलाः ॥ १९ ॥
मुरलो[4] निरुलो नन्दी वारलो[5] वागुजारलः ।
पाकमत्स्यः कृष्णमत्स्यो गोमत्स्यो मकरस्तिमिः ॥ २० ॥
तिमिङ्गिलमहामीनशफरोवर्मि[6]चन्द्रिकाः ।
सहस्रदंष्ट्रः पाठीनः गर्गराः कुलिशादयः ॥ २१ ॥
गोऽश्वोष्ट्रमेदः पुच्छाश्वतरमेषखरादयः ।
ग्राम्याः गुहाशयाः सिंहव्याघ्रद्वीपितरक्षवः ॥ २२ ॥

१. पालेवत[3]
२. राजवसा[3]
३. महिषी[3]
४. सुरलो[2]
५. वारुलो[2,3]
६. वर्म[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बभ्रुश्वदंष्ट्रशृगालौ तु मृगैर्वारुवृकादयः ।
शशघ्नी[1] भासकुररगृध्रचीरिल्ल[2] वायसाः ॥ २३ ॥
कङ्कोलूक[3] श्येनचाषधूमिकामधुहादयः ।
पक्षिणः प्रसहाः पर्णमृगाः मूषकवानरौ ॥ २४ ॥
गोलांगूलद्रुमशयमद्गुपूतिघसादयः ।
श्वेतश्यामश्चित्रपृष्ठः कालकः काकुली[4] मृगः ॥ २५ ॥
भेकचिल्लककूचीकबभ्रुप्रियकशारडकाः[5] ।
कदली नकुलः श्वाविन्नीलीकृत्खराडजाहकाः ॥२६॥
मार्जाराजगरा ह्याखुलोपाकाद्या बिलेशयाः ।
वातघ्नी पित्तला चाल्पकफा चाप्याक्षिकी सुरा ॥२७॥

प्र०—मिश्रेया शतपुष्पाभेदः,गिरिपादिका काकाण्डोला॥१५॥ कपिकच्छ्वादिनिकोचकान्तं फलं । तत्र कपिकच्छूरात्मगुप्ता, वेत्रः प्रसिद्धः, तत्रोरुमाण-मुकूलक-निकोचकानि वरुणदन्त्यङ्कोल्लफलानीत्येके । वातामं मज्जमधुरं स्निग्धं दीर्घम्, अक्षोटं मदनफलाभं मध्योन्नतरेखम् ॥१६॥ अम्लमिति लकुचादीनां कोलान्तानां विशेषणं मधुरादि व्युदासार्थम् । तत्र लकुचं क्षुद्रपनसम्, एलानमैरावतम्, आरुकं कार्तिकेयपुरे प्रसिद्धम्, तच्चतुर्धा—"आरुकं वीरसेनं च वीरं वीरारुकं तथा। विद्याज्जातिविषेण तच्चतुर्विधमारुकम् ॥" इति॥ मृगलेण्डकं कर्कटम, द्राक्षा गोस्तनी, वृक्षाम्लं तित्तिडीकम्, कोशाम्रं लाक्षावृक्षफलम्, नीपं राजकदम्बफलम्, स च "नीपो बृहद्गृहसमीपभुवि प्रभूतो लोके प्रसिद्धतरराजकदम्बनामा । प्रांशुर्मधूकतरुपत्रसमानपत्रः, स्वाद्वम्ल-पक्वफल एष सुगन्धिपुष्पः ॥" इत्युक्तः । आम्रातमम्रवाटम्, कराम्लं करमर्दम् ॥ १७ ॥

प्राचीनामलं पानीयामलकम्, नारङ्गं नारङ्गफलम्, पालेवतं व्याख्यातम् । परुषकं परुषकफलम्, स च—"धन्वनाकारहरितपत्रो

१. शतघ्नी[3]
२. चीरल्लि[3]
३. कङ्कोलूकौ[3]
४. कुक्कुटी[3]
५. शल्यकाः[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गूढाकृतिर्भवेत् । परुषकोऽल्पास्थिमृदुफलः फरसुनामकः ॥"—इत्युक्तः ॥ चिञ्चा चुक्रिका, कोलानि बदराणि, बहुवचनं बृहद्ह्रस्वमध्यमानां ग्रहणार्थम् । लवणं पटु, माषातसीतिलाः धान्यभेदाः प्रसिद्धाः, दधि प्रसिद्धम्, तच्चात्राम्लमधुरस्य प्रागुक्तत्वात् ॥ १८ ॥ कृशरा तिलतण्डुलमाषोत्था[1] क्षीरपेया । वसा मांसस्नेहः, मज्जास्थिभवः[2] स्नेहः, मेदः प्रसिद्धम्, मेषीपय आविकं क्षीरम्, सुरा शालिपिष्टकृतो मद्यविशेषः, पोत्री सूकरः, इभो हस्ती, महिषो लुलायः, राज्यादिकुलिशाद्यन्ताः मत्स्याः कैवर्तं प्रसिद्धाः । तत्र राजी कृशो दीर्घाकारः, राजीवो रेखांकितः, पाटलः पाटलपुष्पाभः ॥ १९ ॥

मुरलो वेष्टिताङ्गः, निरुलो जलनिलीनः, नन्दीवारलः समुद्रझिङ्गकः, वागुजारलो वागुसः, तल्लक्षणम्—

महाशकलसंयुक्तः कृष्णवर्णो महाशिराः ।
महामत्स्यः प्रसिद्धोऽसौ वागुसः स्थुलकण्टकः ॥ इति ॥

पाकमत्स्यःपाकैरर्भकैः सह यो विचरति । "कृष्णमत्स्यस्तु शकली बहुकण्टकसंयुतः । कषायवर्णो रक्ताक्षः कथितो मत्स्यवेदिभिः ॥" इत्युक्तः कृष्णमत्स्यः । गोमत्स्यमकरौ प्रसिद्धौ । तिमिः शतयोजनायामः ॥२०॥

तिमिंगिलो तिमिभक्षकः । महामत्स्यः तिमिङ्गिलगिलः । तदुक्तम्—

"अस्ति मीनस्तिमिर्नाम शतयोजनविस्तृतः ॥
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवे" ॥ इति ॥ शफरी क्षुद्रमत्स्यः, वर्मी[3] सर्पाकारः ।

चन्द्रकः सकण्टकपार्श्वो वर्तुलः, सहस्रदंष्ट्रो महामीनः, पाठीनः रूप्यवर्णोदरो दीर्घः कृष्णवर्णो महाशिराः—"पाठीनो मत्स्यभेदः स्यादेककण्टकमञ्जरी" त्युक्तम् । गर्गरः प्रसिद्धः, कुलिशो वज्राभः आदिशब्दादन्येऽपि तज्जातीयाः ॥ २१ ॥

गवादय खराद्यन्ताः ग्राम्याः ग्रामे भवाः, तत्र गौः प्रसिद्धा, अश्वो घोटकः, उष्ट्र करभः, मेदःपुच्छो डुण्डुकः, एडक इत्येके; अश्वतरो

---

१. माषाम्ल[2]

२. गतः[2]

३. वत्मो[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वेसरः, मेषो मेढः, खरो गर्दभः। सिंहादयो वृकाद्यन्ता गुहासु शेरते गुहाशयाः। तत्र सिंहव्याघ्रौ प्रसिद्धौ, द्वीपी चित्रव्याघ्रः॥ तरक्षुर्मृगादनः॥ २२॥

बभ्रुरच्छभल्लः, श्वा कुक्कुरः, ऋक्षः प्रसिद्धः, शृगालो जम्बुकः, ओतुर्वनमार्जारः, षड्विधो हि मार्जारः—"ग्राम्यो वन्यस्तोयजश्च[1] पक्षि[2]मार्जारविज्जकौ। सुगन्धिवृषणश्चेति मार्जाराः षट् प्रकीर्तिताः"॥ इति॥ मृगैर्वारुः हरिणभुक्, वृको वत्सभक्षः।

शशघ्नीप्रभृतयो मधुहाद्यन्ताः प्रसहाः पक्षिविशेषाः, प्रसह्य बलाद् भक्षयन्तीति प्रसहाः। तत्र शशघ्नी शशहारिणी, भासो गृध्रविशेषः, तल्लक्षणम्:—

"भस्मवर्णः स्वल्पतुण्डः प्रसहो गोष्ठगोचरः।
भासश्चारुगतिर्गृध्रविशेषः परिकीर्तितः॥ इति॥

कुररो हस्तमत्स्यग्राही, तल्लक्षणम्—

"कुररः कुललोऽतिवेगभागरुणाभः सितवर्णमस्तकः।
सलिलात्तटमानयत्यसौ शकुलांस्तद्ध्वनिजातसाध्वसाः॥"

गृध्रः प्रसिद्धः, चीरिल्लश्चिल्लः, वायसः काकः॥ २३॥

कङ्कः स्यात्कण्ठमल्लाख्यो बाणपत्रार्हपक्षकः।
लोहपृष्ठो दीर्घपादः पक्षाधः पाण्डुवर्णभाक्॥ इत्युक्तः॥

उलूकः काकशत्रुः, श्येनः सञ्चानः, चाषः प्रसिद्धः, धूमिका धूम्याटः, मधुहा प्रसिद्धः। मूषकाद्याः पूतिघसाद्यन्ताः पर्णशब्दः शाखोपलक्षणः तत्र मृग्यत इति पर्णमृगाः। तत्र मूषको वृक्षोन्दुरः, वानरो मर्कटः॥ २४॥ गोलांगूलो वानरविशेषः, द्रुमशयो वृक्षमर्कटः, मद्गुर्मालुधानसर्पः॥ पूतिघसः सुगन्धिवृषणो मार्जारः, आदिशब्दात्पक्षमार्जारादायः।

श्वेताद्याः लोपाकाद्यन्ताः बिलेशयाः, बिलेषु शेरते इति बिलेशयाः। श्वेतः श्वेतवर्णः, श्यामः श्यामवर्णः, चित्रपृष्ठो विचित्रपृष्ठः, कालकः कृष्णवर्णः एवं चतुर्धा काकुली मृग इति बाष्पचन्द्रः॥ पंचापि मृग जायत इत्येके॥ २५॥ भेको मण्डूकः, चिल्लकश्चिल्लीतको धूसरवर्णो विडालजातिः, कूचीकाः सक्तवः, बभ्रुर्महानकुलः, प्रियको मृगप्रियकः;

१. तोयजातः[२]

२. पक्ष[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तल्लक्षणन्तु—"कुरंगपुच्छाकृतिकृष्णपुच्छः प्रान्ते स्मृतः कर्बुरितोदरोऽसौ । कृष्णो मुखे खादिरपृष्ठभागो मृगप्रियोऽसौ शुनकस्तरस्वी"॥ इति ॥ शाण्डको गोधानुकारी, कदली सर्पविशेषः, महाविडालसमो व्याघ्राकारो मृगविशेषः इत्येके। नकुलः प्रसिद्धः, श्वावित् सूच्यावृता सेहिकाख्या, नीलीकृल्लोमशकर्णः, खण्डो गोधेरकः, तल्लक्षणम्—

"कृष्णसर्पेण गोधायां जातः सर्पश्चतुष्पदः ।
स वै गोधेरको नाम तेन दष्टो न जीवति ॥"
"जाहको गात्रसङ्कोची मण्डलीयो बुधैः स्मृतः ।"
इत्युक्तो जाहकः ॥ २६ ॥

मार्जारो ग्राम्यमार्जारः, अजगरो महासर्पः, अहिः सर्पः, आखुरुन्दुरकः, लोपाको लोगडकाख्यः श्रृगालभेदः। एतत्सर्वं वातघ्नं पित्तश्लेष्मकरञ्च । विभीतककल्ककृताक्षिकी सुरा। सा वातघ्नी पित्तकरी किञ्चित् श्लेष्मकरी च ॥ २७ ॥

वातघ्नमकफं पित्तकरं तैलं तिलोद्भवम् ।
मारुतघ्नञ्चाल्पपित्तं श्लेष्मलं पक्वमारुकम् ॥ २८ ॥

अनिलघ्नं कफकरमल्पपित्तमुदाहृतम् ।
सामुद्रलवणं मत्स्यो रोहितः प्रस्नुतं दधि ॥ २९ ॥

मसूरगोधूमकुलत्थमुद्गजो
यूषोऽप्यजोऽपित्तकफौ चलापहौ ।
पलाण्डुपक्वाम्रकुरङ्गलेण्डकै-
लानं त्वपित्तं कफकृत्समीरजित् ॥ ३० ॥

॥ इति वातघ्नवर्गः ॥

५

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्र०—तिलतैलं वातघ्नं कफोदासीनं पित्तलञ्च। पक्वमारुकं पक्वं यदारुकं तन्मारुतघ्नं श्लेष्मलं किञ्चित्पित्तकरञ्च ॥ २८ ॥

सामुद्रलवणं प्रसिद्धम् ।

"रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः ।

कृष्णपृष्ठः सर्वमत्स्यश्रेष्ठो रोहितकः स्मृतः" ॥

इत्युक्तो रोहितमत्स्यः। प्रस्नुतं वस्त्रगालितं दधि। एतत् त्रयं वातघ्नं श्लेष्मलं किञ्चित् पित्तलञ्च ॥ २९ ॥

मसूरादिभिर्मिलितैश्चतुर्भिः सिद्धो यूषः। अजश्छागलः। एतौ द्वौ वातघ्नौ पित्तकफोदासीनौ च। ननु सुश्रुतेन यूषे लवणं पञ्चमुक्तम्—

"मसूरमुद्गगोधूमकुलत्थलवणैः कृतः ।

कफपित्ताविरोधी स्याद्वातव्याधौ च शस्यते ॥ इति ।

तत्कथमत्र नोक्तम्। ब्रूमः, यूषशब्देनैव लवणमाक्षिप्तम्। पटु-कट्वम्लस्नेहादिसंस्कृतो धान्यनिःक्वाथो यूष इत्युच्यते। अकृतयूषोऽपि लवणमात्रेण संस्कृत एव। पलाण्डुरुली[1], पक्वमित्याम्रादित्रयस्य विशेषणम्। कुरंगलेण्डिकं मृगलेण्डिकम्[2], एलानं प्रसिद्धम्। एतच्चतुष्टयं वातघ्नं पित्तोदासीनं श्लेष्मलञ्च ॥ ३० ॥

॥ इति वोपदेवीये सिद्धमन्त्रप्रकाशे वातघ्नो वर्गः ॥

———

१. हल्लि[२]
२. कर्कटम्[१]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

२—अथ पित्तघ्नवर्गः

पितघ्नं चन्दनं रिष्टः[1] कदली काशकच्छुरे ।
शुकनासा मांसरोहा नलिका मधुकर्कटी ॥ ३१ ॥
गुन्थो धातुक्यम्बुपर्णी नन्दीमाषतरूटके ।
क्रौञ्चादनञ्च कूष्माण्डमज्जा वंशस्य रोचना ॥ ३२ ॥
कुसुमं मातुलुङ्ग्याश्च वरुणान्मुचुकुन्दतः ।
रत्नानि चन्द्रकान्ताम्बु शीतांभः पङ्कशैवलौ ॥ ३३ ॥
सिताद्राक्षेक्षुरसवान् मन्थः सिद्धामिषं घृते ।
पित्तजिद्वातजननं शिपिस्त्ववशिरात् फलम् ॥ ३४ ॥

प्र०—चन्दनं श्रीखण्डम्, रिष्टो रक्षावीजः, कदली रम्भा, काशः काशेक्षुः कांसुली, कच्छुरा फणिहारी, शुकनासा शुकाह्वा, मांसरोहा मांसरोहिणी, नलिका कपोतचरणा, मधुकर्कटी मधुरा मातुलिङ्गजातिः ॥ ३१ ॥

गुन्थो वृत्ततृणः, धातुकी धातुपुष्पी, अम्बुपर्णी जलमण्डपी, नन्दीमाषो वानीरिका[2] नन्दी जलतुण्डिकेरी, माषो जलवास्तुक इत्यन्ये; तरूटकं कल्हारं, क्रौञ्चादनं थेम्बुलिका, कूष्माण्डमज्जा कूष्माण्डकस्य मज्जा, वंशस्य रोचना वंशरोचना ॥ ३२ ॥

मातुलुङ्ग्यादीनां त्रयाणां कुसुमं, मातुलुङ्गी बीजपूरकः, वरुणः सेतुवृक्षः, मुचुकुन्दो वनकुन्दः । रत्नानि माणिक्यादीनि, चन्द्रकान्ताम्बु चन्द्ररश्मिसंयोगात् स्रुतं जलम्, शीताम्भः शीतोदकम्, पङ्कः कर्दमः, शैवलः शैवालः ॥ ३३ ॥

सिता शर्करा, द्राक्षाया इक्षोश्च रसः एभिस्त्रिभिर्युक्तो मन्थः, घृते सिद्धामिषं सर्पिर्विपक्वं मांसम् । एतत्सर्वं पित्तहरम् ॥ शिपिः गुन्द्रा, अवशिरः सूर्यावर्तस्तस्मात्फलं गजपिप्पल्याकारः फलविशेष इत्यन्ये[3] ॥ ३४ ॥

---

१. पित्ताघ्नश्चन्दनारिष्टः[3]
२. वानरिका[1]
३. इत्येके[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पनसस्य फलं त्वामं तडागांभोऽथ[१] पित्तजित् ।
श्लेष्मकृच्छाल्मली मध्ये कूष्माण्डत्रपुसे तथा ।। ३५ ।।
शाल्याद्याप्यं नदानूपाम्भसी दुग्धं श्रृतं हिमम् ।
पित्तजिद्वातकफकृन्मार्षकं माणनाडिके[२] ।। ३६ ।।
अलाबुनालिका यूथी काष्ठेक्षुः स्थलकन्दकः ।
आलुकानि च केलूढं श्रृङ्गाटककसेरुके[३] ।। ३७ ।।
ढरढराः पद्मकन्दादि भल्लातकुसुमं तथा ।
बालं त्रपुसकालिङ्गकर्कार्वेर्वारुजं फलम् ।। ३८ ।।
नीवाराः कारकातोयं तैलमेकैषिकोद्भवम् ।
फल्गववातकफं बिम्बी त्वकफा पित्तजिद्द्वयम् ।। ३९ ।।
पित्तघ्न्यश्लेष्मला वातकृत्पालङ्क्या तु कुन्तली[४] ।

।। इति पित्तघ्नवर्गः ।।

प्र०—पनसः कण्टकिफलः तस्याममपक्वं फलम्, तडागाम्भस्तडाकोदकम्, एतच्चतुष्टयं पित्तघ्नं वातकरञ्च ।।

शाल्मली तूलिनी, कूष्माण्डत्रपुसे मध्ये मध्यावस्थाने नामे न जरठे[५], कूष्माण्डं कुसुमफलं, त्रपुसं बालुकम् ।। ३५ ।।

शाल्याद्याप्यं जलजं शाल्यादि धान्यं, नदानूपाम्भसी नदानूपोदके, दुग्धं श्रृतं हिमं क्वथितं शीतं क्षीरम् एतत्सर्वं पित्ताजित् श्लेष्मकरञ्च । मार्षकं मंठकं, माणकंदो महापत्रो यथापूर्वमधःपत्रत्यागी कंदविशेषः, नाडिका तस्यैव नाडी ।। ३६ ।।

अलाबुनालिका अलाबोस्तु व्यानाडिका नाड्याकारोऽवयवः, यूथी नीलपुष्पी[६], काष्ठेक्षुरतिकठिन इक्षोर्भेदः, स्थलकन्दो ग्राम्यकन्दः

१. तडागाम्भश्च[२]
२. नालिके[3]
३. कसेरुकम्[3]
४. कुतल्यपि[3]
५. पक्वे[२]
६. नीलद्युपुष्पा[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ओलकं[1] इत्येके॥ आलुकानि पिण्डालुक-मध्वालुक-हस्त्यालुक-काष्ठालुक-शङ्खालुक-रक्तालुकादीनि।

"केलूढं स्वल्पविटपं कन्दे तत्स्वादु शीतलम्।
कोविदेन तु लोकेन केलूढ इति भण्यते॥"

इत्युक्तं केलूढम्, जलोदुम्बर इत्येके। शृङ्गाटकस्त्रिकोणो जलकन्दः। कशेरुकं कृष्णसूक्ष्मो वर्तुलो लोमशकन्दः[2] ॥ ३७॥

ढण्ढणो[3] वृकधूमकः, पद्मकन्दादिकं कमलस्य कन्द-मूल-नाल-पत्रादिकं, भल्लातकुसुमं भल्लातफलस्यास्थिवर्ज्यो भागः। बालमिति त्रपुसादीनां चतुर्णां विशेषणम्। त्रपुसं बालुकं, कालिङ्गकं कालिन्दं, कर्कारु लघुकूष्माण्डं, लघुकालिङ्गमित्येके, दीर्घालाबुकं फलविशेष इत्यन्ये; एर्वारुकं कर्कटीफलम् ॥ ३८॥

नीवाराः वनव्रीहयः, करकातोयं वर्षोपलोत्थमुदकम्, एकैषिकोद्भवं तैलं एकैषिका पाठा,त्रिवृदिति **जैज्झटः** ॥ एतत्सर्वं पितघ्नं वातश्लेष्मकरञ्च। फल्गु काकोदुम्बरिकाफलम् तद्वातश्लेष्मोदासीनम्। बिम्बी तुण्डिकेरी, सा वातकफोदासीना। एतद् द्वयं पित्तघ्नञ्च ॥३९॥

पालङ्क्या वास्तुकसदृशी चीरितपत्रा शाकविशेषः, उपोदकाभेद इत्येके। कुन्तली चञ्चुसदृशो दीर्घपत्रः शाकविशेषः चिरपोटी इत्येके, सूक्ष्मतिलजातिरित्यपरे। एतद्द्वयं पित्तघ्नं श्लेष्मोदासीनं वातलञ्च॥

॥ इति वोपदेवीये सिद्धमन्त्रप्रकाशे पितघ्नः वर्गः॥

१. आलुकं[2]
२. रोमशो जलकन्दः[2]
३. ढंढणः सूरणः[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

३—अथ कफघ्नवर्गः

कफघ्नं[१] शालरोहीतछागकर्णाश्वकर्णकाः ॥ ४० ॥
शमी-कदम्ब-बदरी-शिंशपा-कर्णिकारिकाः ।
हरिद्रकोऽ[२]रिमेदश्च तिलकः कटभीङ्गुदः ॥ ४१ ॥
मदनस्तुवरश्चैव धत्तूरः केतकी तथा ।
कोशातकी देवदाली काकतुण्ड्याखुकर्णिका[३] ॥ ४२ ॥
नदीकामुक[४]मञ्जिष्ठा-स्वरसी-पर्वपुष्पिकाः ।
विष्णुक्रान्ता धनहरो लता कस्तूरिका त्रुटिः ॥ ४३ ॥
कर्पूरो जातिपत्री च कुलत्थी काककुष्ठकम्[५] ।
शिलापुष्प तुत्थकञ्च शिलाजतु मनःशिला ॥ ४४ ॥
शाल्यादिदग्धभूम्युत्थमोदनो भृष्टतण्डुलः ।
वाट्यो धाना यवापूपा उलूकक उलुम्बिका[६] ॥ ४५ ॥
यूषो गजाश्वोष्ट्रघृतं मन्थो द्राक्षामधुप्लुतः ।

प्र०—शालो रालवृक्षः, रोहीतो रोहेण्डकः, छागकर्णः कुशरीरः, अश्वकर्णः सस्यसम्वरः एन इति प्रसिद्धः ॥ ४० ॥

शमी सक्तुफला, कदम्वः कुत्सिताम्बः, बदरी कोली, शिंशपा कृष्णसारः, कणिकारिका कर्णिकारद्रुमः, हरिद्रकः प्रसिद्धः,[७] अरिमेदो-

---

१. कफघ्नाः[३]
२. हारिद्रको[३]
२. पर्णिका[३]
४. कार्मुक[३]
५. कुलत्थीका ककुष्ठकम्[३]
६. उलुम्बका:[३]
७. हरिद्रकः अस्य पुष्पः कपिद्रुमः[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ऽहिमारः, तिलकः स्त्रीवीक्षणदोहदः, कटभी किणही, इङ्गुदस्ताप-सतरुः ॥ ४१ ॥

मदनो गालवृक्षः, तुवरः—

"पत्रैस्तु बकुलाकारैः कलायसदृशैः फलैः ॥
वृक्षस्तुवरको नाम पश्चिमार्णवतीरजः ॥"

इत्युक्तः । धतूरः उन्मत्तः, केतकी प्रसिद्धा, कोशातकी धामार्गवः, देवदाली जीमूतकः, काकतुण्डी काकनासा, आखुकर्णी मूषकपर्णी[1] ॥ ४२ ॥

नदीकामुकः प्राचीबलः, मञ्जिष्ठा योजनवल्ली, स्वरसी[2] कपित्थपर्णी, पर्वपुष्पिका नागदन्ती, विष्णुक्रान्ता प्रसिद्धा, धनहरी चण्डा, लताकस्तूरिका प्रसिद्धा, त्रुटिः सूक्ष्मैला ॥ ४३ ॥

कर्पूरो घनसारः, जातिपत्री जातिकोशः, कुलत्थो वनकुलत्थः, काककुष्ठकं कङ्कुष्ठं, शिलापुष्पं शैलेयं, तुत्थकं मयूरग्रीवं, शिलाजतु गिरिजं, मनःशिला कुनटी ॥ ४४ ॥

शाल्यादि दग्धभूम्युत्थं दग्धायां भुवि जातं शाल्यादि धान्यं, ओदनो भृष्टैस्तण्डुलैः सिद्धः, वाट्यो दलितैर्यवगोधूमादिभिः कृत ओदनः, भृष्टयवोदन इत्येके; धाना भृष्टयवाः, यवापूपा यवकृत-मण्डकाः । उलूककः भृष्टहरितधान्यशिम्बः, उलुम्बिका भृष्टशूक-धान्यजः, यूषो व्याख्यातः । गजाश्वोष्ट्रघृतं गजाश्वोष्ट्रसम्भवं घृतम् , मन्थो द्राक्षामधुप्लुतः द्राक्षारसमाक्षिकाभ्यामालोडितो मन्थः । एतत्सर्वं कफघ्नम् ॥ ४५ ॥

श्लेष्मघ्नं स्याद्वातलं रक्तशिग्रोः
पुष्पाङ्कुरौ दध्यपि स्याद्धयीनाम् ।
स्याच्छ्लेष्मघ्नं पित्तलं ब्रह्मसोमा
क्षाराः सीरी वज्रकन्दः कुसुम्भः ॥ ४६ ॥

कफघ्नं पित्तचल[3]कृद्द्रोणपुष्पी कुरुण्टिका ।
प्रपुन्नाटो वेणुयवा निष्पावाः पक्वचिर्भिटम् ॥ ४७ ॥

१. वृषकर्णी[2]
२. झरसी[2]
३. बलः[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शिम्ब्यो द्रावी च माधूक[1] फाणितं पौत्तिकं मधु।
आसवः सीधवः पक्वशीतमाधूकजाम्बवाः ॥ ४८ ॥

प्र०—रक्तशिग्रोः पुष्पं तस्यैवाङ्कुरः, अश्वानां दधि चेति त्रयं कफहरं वातकरञ्च। ब्रह्मसोमा देवाग्निकः, क्षाराः क्षारविधिकृतान्यौषधभस्मानि तज्जातं भस्म, सीरी लाङ्गली, वज्रकन्दः सुरेन्द्रकन्दः, कुसुम्भं कुसुम्भशाकं, एतत्पञ्चकं कफघ्नं पित्तकरञ्च ॥ ४६ ॥

द्रोणपुष्पी कुम्भी, कुरुण्टिका शितिवारः, प्रपुन्नाट एडगजः, वेणुयवा वंशजा यवाः, निष्पावा बल्याः, पक्वचिर्भिटं पक्वडङ्गरम् ॥ ४७ ॥

शिम्ब्यः प्रसिद्धा यत्संबन्धान्मुद्गादीनां शिम्बिधान्यत्वं, द्रावी टङ्कणः, माधूकफाणितं मधूककुसुमोत्थं फाणितं, पौत्तिकं मधु—"याः कृष्णाः मषकोपमा लघुतराः प्रायो महापिण्डिकां, चिन्वानास्तरुकोटरान्तरगताः पुष्पासवं कुर्वते। तास्तज्ज्ञैरिह पुत्तिकाः निगदितास्ताभिः कृतं पौत्तिकं, मध्वाज्याभमुशन्ति पौत्तिकमिति ख्यातं नराश्चापरे" ॥ इति। आसवो द्रव्याण्यासुत्य कृतं मधुं, पक्वाऽपक्वाभेदाच्चत्वारः सीधवः, सीधुरिक्षुरसकृतं मद्यम्, तत्र पक्वः पक्वेनेक्षुरसेन, शीतस्त्वपक्वेन। माधूको मधूकपुष्पयुतेन, जाम्बवो जम्बूफलयुक्तेन। एतत्सर्वं कफघ्नं वातपित्तकरञ्च ॥ ४८ ॥

कफहृद्वातला[3] पित्तं वेणुपत्री गवेधुका।
लौहित्यः[4] शिम्बिरोद्दालौ जूर्णाह्वो घूर्णपा[5] द्यणुः ॥ ४९ ॥
कुरुविन्दो ब्रह्ममूर्ति[6] र्वरुको वरकोत्कटौ।
हस्तिश्यामाकपानीयश्यामाकशरनाडिकाः ॥ ५० ॥
झिण्टी[7] मुकुन्दगर्मोतो[8] कुम्भिका सप्रशांतिकाः।
तोयपर्णो शिम्बिरादिकुधान्यानीक्षुजासवः ॥ ५१ ॥

---

१. मधुक[3]
२. दवाग्निकः[2]
३. कफघ्नं वातला[3]
४. रोहिष[3]
५. घुणपा[1]
६. मूतिः[3]
७. घण्टी[3]
८. गर्मूटी[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

श्लेष्मघ्नं पित्तलावातमौद्दालं मधु माधवः ।
कफघ्नाल्पमरुत्पित्तौ मार्द्वीक[7]मदिरासवौ ॥ ५२ ॥
खर्जूरमद्यं कफजिद्वातकृन्नातिपित्तलम् ।
अरिष्टस्त्वमरुत्पित्तौ मेषीघृतमपित्तजित् ॥ ५३ ॥
आजं मूत्रं त्वल्पचलं पित्तकृच्छ्लेष्महृत्त्रयम्[8] ॥ ५४ ॥

॥ इति कफघ्नवर्गः ॥

प्र०—वेणुपत्र्यादीनि शिम्बिराद्यन्तानि कुधान्यानि, कुधान्यं तृणधान्यम्। तत्र वेणुपत्री वेणुपत्रसदृशपत्रा, गवेधुका वार्षिकी, लौहित्यो लोहितको रक्तनालः कषायोत्कटः, शिम्बिरस्तीरभुक्ते प्रसिद्धः, स एव मगधे सिल्हकः, उद्दालो वनकोद्रवः, जूर्णाह्वो यावनालः, घूर्णपादी नर्तनकः, अणुरणुकः ॥ ४९ ॥

कुरुविन्दो व्रीहिगुरु; ब्रह्ममूर्तिः प्रसिद्धा, वरुकः शरबीजं, वरको वरहाटकः, उत्कटो लोहिततखगलबीजं, हस्तिश्यामाकः श्यामिका, पानीयश्यामाको जलश्यामाकः, शरः शरकर्णिका, नाडिका नाडयाकारा ॥ ५० ॥

झिण्टी पाण्डुकर्कशा, मुकुन्दो मूलकन्दः, गर्मोती गर्मोतिका, कुम्भिका तुम्बिकाकारा, प्रशांतिका एकशूकोपशुण्डिका, तोदपर्णी तोयपर्णी, शिम्बिरो बहुशिम्बिः। आदिशब्दादन्यान्यप्येवंविधानि, इक्षुजासव इक्षुरसजासवः। एतत्सव कफघ्नं वातकरं पित्तोदासीनञ्च ॥ ५१ ॥

औद्दालं मधुविशेषः, "प्रायो वल्मीकमध्यस्थाः स्वल्पाः कपिलकीटकाः। कषायतिक्तं चिन्वन्ति स्वल्पमौद्दालकं मधु ॥," माधवो मध्वासवः, एतद्द्वयं कफघ्नं पित्तकरं वातोदासीनश्च। द्राक्षासुरा द्राक्षासवौ श्लेष्मघ्नौ किञ्चिद्वातपित्तकरौ ॥ ५२ ॥

खर्जूरफलकृतं मद्यं कफघ्नं वातकरं किञ्चित्पित्तकरञ्च ॥ द्रव्याणि निष्क्वाथ्य कृतं मद्यमरिष्टः, स पित्तवातोदासीनम्, मेषीघृतं पित्तोदासीनम् ॥ ५३ ॥

आजं मूत्रं किञ्चिद्वातलं पित्तलञ्च, एतत्त्रयं श्लेष्मघ्नम् ॥ ५४ ॥

॥ इति वोपदेवीये सिद्धमन्त्रप्रकाशे कफघ्नवर्गः ॥

---

७. मार्द्वीकौ[3]
८.अजामूत्रं स्वल्पवातपित्तलं कफजित् त्रयम्[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

४—अथ वातपित्तघ्नवर्गः

वातपित्तहरं शाकवृक्षो यष्टी शतावरी ।
कपिकच्छुर्वृश्चिकाली प्रियङ्गुः पर्वणी मुरा ॥ ५५ ॥
नेपाली कुक्कुटी हंसपादी लाभज्जमल्लिके ।
मञ्जिष्ठानागदन्त्योस्तु शाकं पुस्तकशिम्बिका ॥ ५६ ॥
मुञ्जातं कोलमाधूके पक्वे द्राक्षाकराम्लके ।
शुष्के मज्जा कोलचारकोशाम्रारग्वधलुङ्गजः ॥ ५७ ॥
तालधात्र्योश्च रक्तेक्षुः रजतं लाजसक्तवः ।
भक्ष्याः सवेसवाराज्यसिद्धसामितफेनकाः ॥ ५८ ॥
घोलसौरावखानिष्काः सन्तानी मांसजो रसः ।
नारिकेलोदकं स्वादु वापीवार्यौद्भिदं जलम् ॥ ५९ ॥
वर्तिकावर्तकेन्द्राभगोनर्दगिरिवर्तिकाः ।
वरशूरः सारपदो वरकः कुक्कुरारटौ ॥ ६० ॥
मयूरः शतपत्रश्च कुक्कुटश्चेति विष्किराः ।

प्र०—शाकवृक्षः खरपत्रः, यष्टी यष्टीमधु, शतावरी प्रसिद्धा, कपिकच्छुरात्मगुप्ता, वृश्चिकाली अग्निकः, प्रियङ्गुर्गन्धद्रव्यं, पर्वणी शाकविशेषः, मुरा गन्धकुटी ॥ ५५ ॥

नेपाली नवमल्लिका, कुक्कुटी—"कुक्कुटाण्डनिभैः कन्दैः किञ्चित्कटुकपिच्छिलैः । स्निग्धैर्मरकतच्छायैः खर्जूरसदृशच्छदैः ।" इत्यष्टांगसंग्रहोक्ता । हंसपादी त्रिपादी, लाभज्जमल्लिके प्रसिद्धे, मञ्जिष्ठाशाकं नागदन्तीशाकञ्च, पुस्तकशिम्बिका पुस्तकाकार शिम्बिः ॥ ५६ ॥

मुञ्जातं कन्दविशेषः, कोलमाधूके, पक्वे कोलं बदरीफलं, माधूकं मधूकफलं, द्राक्षाकराम्लके शुष्के, द्राक्षा गोस्तनी, कराम्लं करमर्दकम् । कोलादीनां धात्र्यन्तानां मज्जा । तत्र कोलं बदरं, चारं प्रियालं कोशाम्रं लाक्षावृक्षफलम्, आरग्वधः शम्पाकफलं, लुङ्गं मातुलुङ्गम् ॥ ५७ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तालं तालकफलं, धात्री आमलकं, रक्तेक्षुः लोहितेक्षुः, रजतं रूप्यं, लाजसक्तवो लाजानां सक्तवः। सवेसंवारादयश्चत्वारो भक्ष्याः। तत्र सवेसवारो वेसवारगर्भः, वेसवारो व्याख्यातः, स्विन्न-पिष्टमुद्गादिकल्को वेसवार इत्येके।

शुण्ठीमरिचपिप्पल्यो धान्यकाजाजिदाडिमम्।
पिप्पलीमूलसंयुक्तं वेसवार इति स्मृतः॥

इत्यन्ये।

पिप्पली मरिचं विश्वं सर्पिर्गुडसमन्वितम्।
एकत्र योजितं सर्वं वेसवार इति स्मृतः॥

इत्यपरे।

आज्यसिद्धो घृतपक्वः, सामितः समिताकृतो मण्डकादिः समिद्-गोधूमचूर्णं, फेनकः पूपविशेषः, तल्लक्षणम्—

विमृद्य समितां शुष्कां विमलां नातिशर्कराम्।
संवेष्टनाय गर्भार्थं खरपाके घृते पचेत्॥

घृतपूरसमाकारं यथाभिप्रेतविस्तृतम्।
फेनकं फेनसंकाशं कुर्यात् सूपविधानवित्॥ इत्युक्तम्॥५८॥

घोलो दधिविकारः। उक्तञ्च—

ससारासारपादार्धसमांबुमथितं दधि।
क्रमेण घोलमथिततक्रोदश्वित्सितोदकम्॥ इति।

सौरावः सौरकः। तल्लक्षणम्—

मासं निरस्थि सुस्विन्नं वेसवारैः सुसाधितम्।
सारितं शीतलं स्वच्छं धूपितं सौरकः स्मृतः॥ इति।

खानिष्कः परिशुष्कामिषभेदः। वेसवारामिषभद इत्येके। अन्ये त्वाहुः—

सौरावस्तु स विज्ञेयो रसो यो लवणस्तनुः।
स एव वेसवारेण मिश्रः खानिष्क उच्यते॥ इति।

संतानी क्षीरस्योपरि स्त्यानो भागः। मांसजो रसः मांसजो निःक्वाथः, नारिकेलोदकं द्रवावस्थं नारिकेलं तत्स्थमुदकम्[1]।

स्वादु वापीवारि मधुरं दीर्घिकातोयं, औद्भिदं जलं भूमि उद्भिद्योर्ध्वं निर्गच्छद्वारि॥ ५९॥

---

१. नालिकेरवारि²

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वर्तिकादयः कुक्कुटान्ता विष्किराः। तत्र वर्तिका वर्तकसदृशी ततोऽप्यल्पा, वर्तकस्तद्भेदो महान् वर्तीरादल्पः, इन्द्राभः कंकभेदो विचित्रवर्णः, गोनर्दो गोनदः, गिरिवर्तिका वर्तिकाभेदः पर्वतचारी, वरशूरोऽत्यन्तशौर्यवान्, सारपदः कंकभेदश्चारुगतिः, वरकः प्रसिद्धः, कुक्कुः कुक्कुशब्दोच्चारी, आरटो वोरटी[1] ॥ ६० ॥

मयूरः नीलकण्ठः, शतपत्रो दार्वाघाटः, तल्लक्षणम् :—

दारूणामाहननाद्दार्वाघाटस्तु दीर्घचञ्चुशिराः।
कर्बुरवर्णो लोके प्रथितोऽसौ काष्ठकुट्टकः पक्षी ॥ इति ॥

कुक्कुटस्ताम्रचूडः। एतत्सर्वं वातपित्तघ्नम् ॥

श्लेष्मलं वातपित्ताघ्नं तालद्रुर्नरपुष्पकः ॥ ६१ ॥
मेदे विदार्य्यौ काकोल्यौ वृद्धचर्द्धी जीवकर्षभौ।
कलम्बुका कञ्चटकस्तथा क्षीरपलाराडुकः ॥ ६२ ॥
लक्ष्मणोपोदकासूर्पपर्ण्यौ पुष्पं मधूकजम्।
लुङ्गमांसं त्र्यक्षतालखर्जूरादेः फलाग्रजौ ॥ ६३ ॥
फलं रम्भाङ्कोलचारसौवीरं चाथ पाकिमम्।
तूदद्राक्षाम्रातशेलुपनसं करमर्दकम् ॥ ६४ ॥
बालं कूष्माराडकं खण्डं मत्स्यराडी गुडसट्टकाः।
क्षीरक्षौद्रसिताशाकेक्षुभक्ष्याः घृतपूरकाः ॥ ६५ ॥
नवनीतं घृतं क्षीरं भृतक्षीरजमाहिषे।
दधिनी दधि सश्वेतं तक्रं स्वाद्विक्षुजो रसः ॥ ६६ ॥
तैलं भूनिम्बशेलक्षकोलाक्षोटातिमुक्तजम्।
चाराक्कंवल्लीजीवन्तीनारिकेलमधूकजम् ॥ ६७ ॥
कर्कार्विवारुकूष्माराडकालिङ्गत्रपुसादिजम्।
कुलिङ्गकुक्कुटौ ग्राम्यौ गोधा च गवयो रुरुः ॥ ६८ ॥
वन्यो गौश्चमरो रोही सृमराद्या महामृगाः।
हंससारसकादम्बवककाररडवप्लवाः ॥ ६९ ॥

१. वारडी[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

श्रृगालकण्ठ[1]श्चक्राह्वो बलाका रक्तशीर्षकः ।
नन्दीमुखः काकतुण्डः सुमुखो मणितुण्डकः ॥ ७० ॥
शराटिका घनारावः कोशकाल्याम्बुकुक्कुटी ।
उत्क्रोश आरा भारुण्ड आटिः पुष्करशायिका ॥ ७१ ॥
पुण्डरीकाद्यकाचाक्षमल्लिकाक्षाश्च केशरी ।
कोनीलरोहिणीमद्गुक्रौञ्चाद्याः जलपक्षिणः ॥ ७२ ॥
चुल्लकी[2]कूर्मकुम्भीरशिशुमारोद्रकर्कटाः ।
नक्रादयः पादिनोऽथ शङ्खशम्बूकशुक्तयः ॥ ७३ ॥
कपर्दकः शङ्खनको[3] भल्लूकाद्याश्च कोशिनः ।

प्र०—तालद्रुस्तालवृक्षः, नरपुष्पको नरफुल्लकः ॥ ६१ ॥

मेदे मेदा महामेदा च, विदार्यौ विदारी क्षीरविदारी च, काकोल्यौ काकोली क्षीरकाकोली च, वृद्धर्द्धी वृद्धिः ऋद्धिश्च, जीवकर्षभौ जीवकः ऋषभश्च, कलम्बुकाकञ्चटकौ जलशाकविशेषौ, क्षीरपलाण्डुः सक्षीरो मधुरः पलाण्डुभेदः ॥ ६२ ॥

लक्ष्मणा रक्तबिन्दुच्छदा, उपोदका उपोदकी, सूर्पपर्ण्यौ मुद्गपर्णी माषपर्णी च, पुष्पं मधूकजं मधूककुसुमं फलवद् भक्ष्यं, लुङ्गमांसं मातुलुङ्गस्य त्वक्केसरवर्जितो मध्यभागः। त्र्यक्षादीनां फलमग्रजश्च। तत्र त्र्यक्षो नारिकेलः, तालो दीर्घतरुः, खर्जूरः स्वादुमस्तकः, आदिशब्दादन्येऽप्येवंविधाः, अग्रजो मस्तकमज्जा ॥ ६३ ॥

रम्भादीनां त्रयाणां फलम्। तत्र रंभा कदली, अंकोलोऽङ्कोठः, चारः पियालः, सौवीरं मरुदेशजं मधुरं महद् बदरम्। पाकिममिति तूदादेः फलषट्कविशेषणम्। तूदमुत्तरापथजम्, द्राक्षा गोस्तनी, आम्रातमाम्रवाटम्, शेलु श्लेष्मातकम्, पनसः कण्टकिफलम्, करमर्दकम् कराम्लकम्, पाकिमं पक्वम् ॥ ६४ ॥

बालं कोमलं कूष्माण्डं, खण्डं, मत्स्याण्डी खण्डशर्करा इक्षुविकारः। उक्तञ्च—

१. मृणालकण्ठः[3]

२. चुलुकी[2] चुल्लुकी[3]

३. नखो[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इक्षोः रसस्य समलस्यांशार्धाङ्घ्रिमलाः मताः।
विकारा फाणित-गुड-मत्स्यण्डी-खण्ड-शर्कराः ॥

सट्टकः—

लवङ्गव्योषखण्डैस्तु दधि निर्मथ्य गालितम्।
दाडिमीबीजसंयुक्तं चन्द्रचूर्णावचूर्णितम ॥
सट्टकं तु प्रमोदाख्यं नलादिभिरुदाहृतम्।

इत्युक्तः। क्षीरादिभिः कृताः भक्ष्याः। तत्र क्षीरं दुग्धं, क्षौद्रं मधु, सिता शर्करा, शाकं कूष्माण्डादि, इक्षु गुडकाष्ठं, घृतपूरकः "मर्दितः समितापिण्डः पयसाऽऽलोड्य साधितः।

घृतावगाहितः पक्वः स्यादेष घृतपूरकः ॥ इत्युक्तः ॥ ६५ ॥

नवनीतघृतक्षीराणि प्रसिद्धानि। शृतक्षीरजमाहिषे दधिनी शृतक्षीरजं क्वथितक्षीरजं, माहिषं महिषीक्षीरजं, दधि सश्वेतं शर्करामिश्रितं दधि, तक्रं स्वादु मधुरं तक्रं, इक्षुजो रसः इक्षुरसः ॥६६॥

भूनिम्बादीनां त्रपुसान्तानां तैलम्। तत्र भूनिम्बः किराततिक्तकः, शेलुः श्लेष्मान्तकः, अक्षो विभीतकः, कोलं बदरं, अक्षोटः कर्पराल: अतिमुक्तो माधवी, चारः पियालः, अर्कवल्ली आदित्यभक्ता, जीवन्ती स्वर्णजीवन्ती, नारिकेलस्त्र्यक्षः, मधूको मधूकद्रुमः ॥ ६७ ॥

कर्कारुः व्याख्यात, एर्वारुः कर्कटी, कूष्माण्डं पुष्पफलम्, कालिङ्गं कालिन्दम्, त्रपुसं बालुकं, आदिशब्दादन्यान्यप्येवंविधानि; एषां फलमज्जातः प्रायस्तैलमुत्पादयन्ति। कुलिङ्गकुक्कुटौ ग्राम्यौ, कुलिङ्गश्चटकः, कुक्कुटस्ताम्रचूडः, ग्राम्यौ ग्रामचारिणौ। गोधा खङ्गः गवयादयः सृमराद्यंता महामृगाः आरण्या पशवः। तत्र गवयो गवाकारः सास्नाककुदरहितः, रौतीति रुरुः, तल्लक्षणम्—

विकटबहुविषाणः शंबराकारदेहः
सलिलतटचरत्वाच्छंबरेभ्यो विभिन्नः।
त्यजति शरदि शृङ्गं रौत्यतोऽसौ रुरुः स्यात्
पृथुल[1]मृगविशेषः प्रायशश्चेदिदेशः ॥ ६८ ॥

वन्यो गौररण्यचरो गोभेदः, चमरः केशमृत्युः गोसदृशः, रोही रोहीतकः, सृमरो मत्स्याकारश्चमरसदृशः, वेगवान्महाशूकर इत्येके,

१. प्रचुर[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

आदिशब्दादन्येऽप्येवंविधाः। हंसाद्या क्रौञ्चाद्यन्ताः जलपक्षिणः। हंसो मानसौकाः, सारसो लक्ष्मणः, कादम्बः कलहंसो धूसरपक्षः, वकः पाण्डुरः क्षुद्रमत्स्यादः, कारण्डवः काकवक्त्रो दीर्घाङ्घ्रिः कृष्णवर्णः, प्लवो महाप्रमाणप्रसेचकगलः ॥ ६९ ॥

शृगालकण्ठः कालवलाकः, चक्राह्वश्चक्रवाकः, बलाका बिसकण्ठिका, रक्तशीर्षको रक्तशिराः सारसभेदः। नन्दीमुखः—

"नन्दीमुखः स्यात् पत्राटी कूलचारी विहङ्गमः।
आटिभेदो लघुश्चित्रवर्णश्चित्राङ्गकाभिधः॥

काकतुण्डो वायसतुण्डः, सुमुखः शोभनमुखो भारुण्डभेदः, मणितुण्डकस्तरक्षुः ॥ ७० ॥

शराटिका गर्गराटी खदिरवर्णा, घनारावश्चातकः, कोशकाली पद्मकोशनलिनी, अम्बुकुक्कुटी जलकुक्कुटी कृष्णवर्णा, उत्क्रोशः कुररभेदः, आरा आरामुखी, भारुण्डः संघातचारी, अटिराडिः, पुष्करशायिका पद्मशायिनी शैवालादा ॥ ७१ ॥

पुण्डरीकाक्षः पद्मनेत्रः पद्मकन्दादः, काचाक्षमल्लिकाक्षौ—

"स्थित्वा चिरं नभसि वीक्ष्य जलाशयान्त-
र्मत्स्यं ततः पतति लोष्ठवदम्बुमध्ये॥
काचाक्ष एष कथितश्च कपर्दकाक्षः
शुक्लाक्षः शुक्लशबलः स तु मल्लिकाक्षः॥

इत्युक्तौ। केसरी सटावान्, कोनीलः श्यामपृष्ठः श्वेतोदरः पानीयवर्तिकाख्यः, रोहिणी लोहितवर्णा, मद्गुर्जलकाकः क्रौञ्चसदृशः, क्रौञ्चः, आदिशब्दादन्येऽप्येवंविधाः ॥ ७२ ॥

चुल्लकीप्रभृतयो नक्राद्यंताः पादिनो जलेशयाः, पादिनश्चरणवन्तः। तत्र चुल्लकी शिशुमारभेदः स्वल्पः, कूर्मः कच्छपः, कुम्भीरो नक्रभेदो महान् घडियालाख्यः[1], शिशुमारो हस्त्याकारोऽन्तर्वक्त्रो बहिर्निःश्वासमुक्, उद्रो जलबिडालः, कर्कटः कुलीरः, नक्रो वक्त्राकारः, आदिशब्दादन्येऽप्येवंविधाः। शङ्खादयो भल्लूकाद्यन्ताश्च कोशिनो

१. महानक्रसदृशः[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

जलेशयाः, कोशिनोऽस्थिमध्यस्थाः। तत्र शङ्खः कम्बुः, शम्बूकशुक्तिके प्रसिद्धे ॥ ७३ ॥

कर्पदको वराटकः, शङ्खनकः क्षुद्रशङ्खः, भल्लूको महान् कपर्दकः, आदिशब्दादन्येऽप्येवंविधाः। एतत्सर्वं वातपित्तघ्नं कफकरञ्च।

वातपित्तघ्नमकफं चञ्चुर्हिस्फित्थमेथिकाः ॥ ७४ ॥
पक्वं परुषकाश्मर्यपाटलासिञ्चतीफलम् ।
गोधूमधान्यश्च गुडो जीर्णधौतो सितोपला ॥ ७५ ॥
पुष्पाम्भोऽथ कुरंगर्क्ष[1]श्वदंष्ट्रामशम्बराः ।
करालः कृतमालश्च चारुष्कपृषतोरणाः ॥ ७६ ॥
वरपोतः कालपुच्छः रङ्कुगोकर्णगोमृगाः ।
मराडमूलः कोट्टकारो राजीवशरभादयः ॥ ७७ ॥

प्र० —चञ्चुर्नाडिकाकारपत्रः, हिस्फित्थो बृहत्पत्रो मेथिका-भेदस्तुरुष्कप्रसिद्धोऽश्वभक्ष्यः, मेथिका मेथी ॥ ७४ ॥

पक्वमिति परुषादिफलचतुष्कविषयम्। तत्र परुषको मृदुफलः, काश्मर्यः श्रीपर्णी, पाटला वसंतदूती, सिञ्चती उत्तरापथजा मुष्टि-प्रमाणातिमधुरबदरी। गोधूमधान्यं गोधूमाख्यं शूकधान्यं, गुडो-जीर्णधौतो जीर्णः पुराणः धौतः शोधितः, सितोपला शर्करा ॥ ७५ ॥

पुष्पाम्भः सुरभिकुसुमाधिवासितं तोयम्। कुरङ्गादयः शरभा-द्यन्ताः मृगाः। तत्र कुरङ्गश्चतुरङ्गः, ऋक्षो नीलाण्डो राजाख्यः[2], श्वदंष्ट्रोऽतिदुष्टकर्कट इति कार्तिकेयपुरे[3] प्रसिद्धः, रामो महान् पुरुषवर्णो हिमवति, शम्बरो विकटबहुविषाणः, करालोऽधो-निष्क्रान्तदन्तः कस्तूरीमृगः, कृतमालः संघातचारी, चारुष्कः चारुः स्वल्पः, पृषतो बिन्दुभिश्चत्रितः, उरणो रूपकः ॥ ७६ ॥

वरपोतः श्रेष्ठशावः, कालपुच्छः सीत्कारकः, रङ्कुर्हुडियारः, गोकर्णो बहुबिन्दुर्बहुश्रृंगः, गोमृगो गोसदृशः, मण्डमूलो मलिनाङ्गः,

---

१. गर्ध्य[2]

२. रोमाख्यः[2],

३. पुराणे[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कोट्टकारो घोट्टकारः[1]। राजीवः पद्मवर्णः, शरभः—

उष्ट्रमानो महाशृङ्गश्चतुर्भिश्चरणैरधः।
चतुर्भिरूर्ध्वं संयुक्तः काश्मीरे शरभो मृगः॥

इत्युक्तः। आदिशब्दादन्येऽप्येवंविधाः ज्ञेयाः॥ ७७॥

मृगाश्चकोरवर्तीककुरुबाहुपृथालकाः ।
सारङ्गनप्तृकारक्तवर्त्मवतीरकुक्कुभाः ॥ ७८॥
कुतित्तिरिश्चोपचक्रक्रकराद्यास्तु विष्किराः ।

॥ इति वातपित्तघ्नवर्गः ॥

प्र०—चकोरादयः क्रकराद्यन्ता विष्किराः पक्षिणः। तत्र चकोरो रक्ताक्षो विषसूचकः, वर्तीको वन्यचटकः स्वल्पसंघातचारी, कुरुबाहुः कुरुकुरुकः स एवाध्रीणसः। तल्लक्षणम्—

नीलग्रीवो रक्तशिराः शुक्लपक्षो विहङ्गमः।
स एवाध्रीणसः प्रोक्त इत्येषा नैगमी श्रुतिः॥ इति॥

"पृथालकोऽसौ यवगाण्डिरेति[2] लोके प्रसिद्धापरनामधेयः।
कृष्णोदरः कर्बुरकृष्णवर्णशीर्षो भवेद्धूसरवर्णदेहः॥" इत्युक्तः। सारंगः कृष्णशबलश्चातकाकारः,

"नप्तृका चटका ख्याता लोके गडुयिका[3]भिधा।
गुञ्जारकारिणी स्वल्पा पाण्डुरा पाण्डुरोदरा॥" इत्युक्ता॥

रक्तवर्त्मा रक्तचरणो लावभेदः, स्थलचरकुर्कुट इत्यपरे, वर्तीरः कपिञ्जलसदृशः स्वल्पः, कुक्कुभः—"नीलच्छविः कृष्णगलः स्याद् ग्रामचटकाकृतिः। कुक्कुभः कुक्कुभारावः स्थलजो रक्तवर्त्मकः" इत्युक्तः॥ ७८॥

---

१. घटकारः[1]
२. मन्दुरेति[2]
३. गुड्डुरुका[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कुत्तित्तिरिः पाण्डुकपिलतित्तिरिभेदः, उपचक्रश्चक्रदलः कृशचञ्चुर्मदाविलः, स्थलचक्रवाक इत्यन्ये । क्रकरः—

"क्रेति शब्दकरणात् क्रकरः स्यात्पीतकृष्णगललोहितपृष्ठः ।
कृष्णपादयुगचञ्चुविभागस्त्र्याहलेषु विहगः प्रथितोऽसौ" ।। इत्युक्तः ।

आदिशब्दादन्येऽप्येवंविधाः ।। एतत्सर्वं वातपित्तघ्नं श्लेष्मोदासीनञ्च ।।

।। इति वोपदेवीये सिद्धमन्त्रप्रकाशे वातपित्तघ्नवर्गः ।।

—:*:*:—

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

॥ अथ कफवातघ्नवर्गः ॥

कफानिलघ्नं देवाह्वं हिंस्राकट्फलमुष्ककाः ॥ ७९ ॥
धर्मिणोऽश्मन्तसरलमधुद्रुपारिभद्रकाः ।
स्नुही करीरबकुलौ करमर्द्दाम्लवेतसः ॥ ८० ॥
श्रीवेष्टको गुग्गुलुश्च करञ्जच्छदनाङ्कुरौ ।
पत्रकं सैर्यको रास्ना निर्गुण्ड्येरण्डमार्कवाः ॥ ८१ ॥
वर्षाभूः हपुषा मुण्डी तेजोवत्यश्वकन्दकः ।
तर्कार्याघाटबृहती रामठो[1] देवसर्षपः ॥ ८२ ॥
कालशाकोऽम्लिकाकन्दः स्निग्धसिद्धञ्च मूलकम् ।
कङ्कोल-कुष्ठ-कर्चूर-तालीसञ्चोर-पौष्करे ॥ ८३ ॥
जीरकं वाष्पिका-बस्तमोदा-मातङ्गपिप्पली ।
तुम्बुरुःशतपुष्पा च भार्ङ्गी कालाञ्जनी वचा ॥ ८४ ॥
वत्सादनी कङ्गुणिका शेफाली वृद्धदारकः ।
शिरीषिका कर्कटाह्वा फलमश्मन्तधन्वनात् ॥ ८५ ॥
पलाश-वेल्लेभबला-मिश्रेया - जाति - मूलकात् ।
पक्वं वृक्षाम्ल-कोशाम्र-त्रपुसं शुष्कमाम्रकम् ॥ ८६ ॥
मज्जाक्षादस्थिभल्लातात्लुङ्गात्त्वग्बीजकेसरम् ।
कुन्दुरुर्बिडकासीसे गोरुचिर्मृगजा नखम् ॥ ८७ ॥

---
१. रामठं२

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पक्व इक्षो रसो वाप्यम्बूष्णाम्भः शैशिरं जलम् ।
दुग्धं शृतोष्णां करभीक्षीरं कारेणवं दधि ।। ८८ ।।
तक्रं च कूचिकामस्तु तैले चैरण्डनिम्बजे ।
कुलत्थैस्तत्कोलयवैर्यूषः काम्बलिकः खलः ।। ८९ ।।

प्र०—देवाह्वं देवदारु, हिंस्रा कन्थारी, कट्फलः सोमवल्कलः, मुष्कको मोक्षः ।। ७९ ।।

धर्मिणो धन्वनः, अश्मन्तोऽम्लोटजः, सरलश्चीडा, मधुद्रुः मधूकः, पारिभद्रः कण्टकिंकिंशुकः, स्नुही समन्तदुग्धा, करीरो गूढपत्रः, बकुलो मद्यदोहदः, करमर्दी क्षीरफला, अम्लवेतसो वेतसाम्लः ।।८०।।

श्रीवेष्टकः श्रीवासः, गुग्गुलुर्महिषाख्यः, करञ्जच्छदनाङ्कुरौ करञ्जो नक्तमालस्तस्य छदनं पत्रं तस्यैवाङ्कुरोऽभिनवोद्भेदः, पत्रकं गन्धपत्रकम् । सैर्यकः कुरण्टकः, रास्ना एलापर्णी, निर्गुण्डी सिन्धुवारकः, एरण्डः पञ्चाङ्गुलः, मार्कवो भृङ्गराजः ।। ८१ ।।

वर्षाभूः पुनर्नवा, हपुषा विपुषा, मुण्डी कुलहलः, तेजोवती तेजोह्वा, अश्वकन्दोऽश्वगन्धा, तर्कारी अग्निमन्थः, आघाटोऽपामार्गः, बृहती सिंही, रामठः काण्डीरभेदः, यदाह **वाष्पचन्द्रः**—

> "हरितो द्विविधः प्रोक्तः काण्डीरस्तत्त्वदर्शिभिः ।
> कटुकः कच्छदेशादौ भक्षयन्त्याममेव तु ।।
> द्वितीयस्तूदकोद्भूतः रामठ[1] इति गीयते ।"

देवसर्षपो गौरसर्षपः ।। ८२ ।।

कालशाकः कालिकाशाकः ।। अम्लिकाकन्दः

> "अम्लिका स्वल्पविटपा सुकुमाराम्लनालिका ।
> प्रायेण कामरूपादौ तत्कन्दश्चार्शसे हितः"

इति **वाष्पचन्द्रोक्तः** । स्निग्धसिद्धं च मूलकं स्नेहपक्वं मूलकं हरितपर्णं, कङ्कोलं कटुकफलं' कुष्ठं पाकलं, कर्चूरः शटी, तालीसं तालीसपत्रं, चोरश्चोरकः, पुष्करं पुष्करमूलम् ।। ८३ ।।

---

१. शमण्ठ[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

जीरकमजाजी, बाष्पिका हिङ्गुपत्री, वस्तमोदा अजमोदा, मातङ्गपिपली गजपिप्पली, तुम्बुरुः तीक्ष्णत्वक् शतपुष्पा सिसिः, भार्ङ्गी द्विजयष्टिः, कालाञ्जनी नीली, वचा उग्रगन्धा ॥ ८४ ॥

वत्सादनी सुदर्शनी, कङ्गुणिका ज्योतिष्मती, शेफाली पुष्पवर्षिणी, वृद्धदारको वेल्लरी, तल्लक्षणमष्टाङ्गहृदये—

"त्रिकोणकाण्डा सुबहुप्रताना, फलेषु पीता कुसुमेषु रक्ता।
पत्रैः सदुग्धैर्मृदुरोमवद्भि स्ताम्बूलतुल्यैर्घनमूलकन्दः ॥ इति ॥

शिरीषिका ढण्ढणिका, कर्कटाह्वा कर्कटश्रृङ्गी, अश्मन्तादीनां मूलकान्तानां फलम् ॥ तत्राश्मन्तोऽम्लोटजः, धन्वनो धर्मिणः ॥ ८५ ॥

पलाशः किंशुकः, वेल्लं विडंगं, इभबला नागबला, मिश्रेया मधुरिका; जाती मालती, मूलकं हरितपर्णं, पक्वमिति वृक्षाम्लादिफलत्रयविशेषणं, तत्र वृक्षाम्लं तित्तिडीकं, कोशाम्रं लाक्षावृक्षफलं, त्रपुसं बालुकं, शुष्कमाम्रं शुष्कचूतफलम् ॥ ८६ ॥

मज्जाक्षाद्बिभीतकज्जा, अस्थि भल्लातात् भल्लातकास्थि, लुङ्गात्वग्बीजकेसरं मातुलुङ्गस्य त्वग्बीजं केसरञ्च, कुन्दुरुः शल्लकीखपुरः, बिडं बिडलवणं, कासीसं धातुकासीसं, गोरुचिः गोरोचना, मृगजा कस्तूरी, नखं गन्धनखम् ॥ ८७ ॥

पक्व इक्षो रसः, वाप्यम्बु दीर्घिकाजलं, उष्णाम्भः क्वथितोष्णमुदकं, शैशिरं जलं शिशिरर्तुसम्बन्धादुत्पन्नातिशयशैत्यं जलम्, भौमं तोयं दिव्यस्यानार्तवत्वदोषात्। दुग्धं श्रृतोष्णं क्वथितं कोष्णं क्षीरं, करभीक्षीरं उष्ट्रीदुग्धम्, कारेणवं दधि हस्तिनीदधि ॥ ८८ ॥

तक्रं कालशेयं, कूचिकामस्तु दधिमण्डः, तैले एरण्डनिंबजे एरण्डफलनिम्बफलतैलञ्च, कुलत्थैः कृतो यूषः, तत्कोलयवैर्यूषः कुलत्थबदरयवजो यूषः, काम्बलिको व्याख्यातः खलश्च। एतत्सर्वं श्लेष्मवातहरम् ॥ ८९ ॥

पित्तलं कफवातघ्नं वरुणः करुणोऽगुरुः।
शिग्रवर्कालर्ककराटाली[1] भूस्तृणां मरिचः क्षवः ॥ ९० ॥

१. कण्टारी[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कारडीरस्तुलसी स्वास्यस्ताम्बूली शृङ्गबेरिका ।
फणिज्जकश्च चाङ्गेरी-पिप्पलीमूलचित्रकम् ॥ ९१ ॥
चव्यं त्वचं च वाराहीकन्दो लशुनगृञ्जनौ ।
पुन्नाटवाकुचीबीजं लुङ्गीजम्बीरजं फलम् ॥ ९२ ॥
चिञ्चावार्तकिकालिङ्गकर्कार्वैर्वारुपाकिमम् ।
पीलूषणां बालबिल्वं तोदनं शीर्णवृन्तकम् ॥ ९३ ॥
मरिचैला - दीप्यगन्धासुरीसर्षपरामठम् ।
गुलिकालवणां स्वर्जिर्यवोषक्षारगन्धकाः ॥ ९४ ॥
कुसुम्भश्च कुलत्थश्च क्षारकूपाम्बुशुक्तकम् ।
मद्यं मूत्रं काञ्जिकञ्च सौवीरकतुषोदके ॥ ९५ ॥
खलः काम्बलिकश्चैव गोरसेन विपाचितौ ।
तैलं मूलकजीमूतकुटजार्ककरञ्जजम् ॥ ९६ ॥
विडङ्गक्ष्वेडकोशाम्रतुम्बीसर्षपशिग्रुजम् ।
ज्योतिष्मतीङ्गुदीपार्थ-पृथ्वीका-हस्तिकर्णजम् ॥ ९७ ॥
आरुष्करं तौवरकं द्रवन्ती - सप्तलोद्भवम् ।
नीलिकाशङ्खिनीश्यामादन्तीकम्पिल्लपीलुजम् ॥ ९८ ॥
देवाह्वचीडागम्भीरीशिंशिपागरुसारजम् ।
अपित्तं कफवातघ्नं बिल्वः पत्तूरकोऽर्जकः ॥ ९९ ॥

प्र०—वरुणः सेतुवृक्षः, करुणः, छागलाख्यः, अगरुर्जोङ्गकः, शिग्रुः सौभाञ्जनकः, अर्को रूपिका, अलर्को मन्दारः, कण्टाली कण्टकारी, भूस्तृणं मालातृणं, मरिचो जम्बीरशाकम्,

तल्लक्षणम् :—

जम्बीरगन्धि हरितं यदम्लकटुकं रसे ।
शाकं जम्बीरमित्युक्तं जंभजं चोत्तरापथे ॥ इति ॥

क्षवः छिक्किका ॥ ९० ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

काण्डीरो व्याख्यातः, तुलसी देवदुन्दुभिः, स्वास्यः सुमुखः, ताम्बूली नागवल्ली, शृङ्गवेरिका गोजिह्वाभेदः,

शृङ्गवेरवदाकृत्या शृङ्गवेरी विभाविता।
कुस्तुम्बुरुवदाकृत्या तुंबुरूणि बृहन्ति च ॥ इत्येके ॥

फणिज्जको मरुवकः, चाङ्गेरी अम्लपर्णी, पिप्पलीमूलं ग्रन्थिकं, चित्रको वह्निः ॥ ९१ ॥

चव्यं चविका, त्वचं गन्धत्वक्, वाराहीकन्दः--

"क्षीरान्विता मूलकतुल्यकन्दा सप्ताष्टपत्रा सितरक्तकाण्डा।
बिभर्त्ति या पल्लवमब्दशब्दात् सा कञ्चुकी श्वेतपुर्वरेण्या ॥[3]

इत्यष्टाङ्गसंग्रहे ॥

"शाककर्कशवाराहवृषणाकारकन्दका ।
ताम्बूलवल्लीछदवद्वाराही गृष्टिकोच्यते ॥

इत्यन्यत्रोक्ता वाराही तस्याः कन्दः, लशुनो रसोनः, गृञ्जनः पलाण्डुभेदः, तथा च वाप्पचन्द्रः—

गन्धाकृतिरसैस्तुल्यो गृञ्जनस्तु पलाण्डुना।
सूक्ष्मनालाग्रपत्रत्वाद् भिद्यतेऽसौ पलाण्डुतः ॥ इति ॥

पुन्नाटबाकुचीबीजं; पुन्नाट एडगजः, बाकुची सोमराजी तयोर्बीजं; लुङ्गीजम्बीरजं फलम्; लुङ्गी मातुलुङ्गी, जम्बीरो दन्तशठः ताभ्यां जातं फलम् ॥ ९२ ॥

पाकिममिति चिञ्चादिपंचकफलविशेषणम्। तत्र चिञ्चा चुक्रिका, वार्ताकं वृन्ताकं, कालिन्दं कालिङ्गं, कर्कारु व्याख्यातं, एर्वारुः कर्कटी, पीलूषणं कटुरसं पीलुफलम्, बालबिल्वं कोमलबिल्वफलम्, तोदनं राजप्रियं, शीतफलं रावणाम्लिका[1], काश्मीराम्लिकेत्येके; शीर्णवृन्तकं मुखवासफलम्, कर्वखकमित्येके[2] क्षुर[3] पत्रमित्यन्ये ॥ ९३ ॥

---

१. क्षीरणाख्यम्[2]
२. मुखवासकं फलं कर्चमित्येके[2]
३. क्षुद्र[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मरिचं तीक्ष्णं, एला स्थूलैला, दीप्यो यवानी, गन्धा पशुगन्धा, आसुरी राजिका, सर्षपः सिद्धार्थः, रामठं हिङ्गु; गुलिकालवणं पाकातिशृतत्वाद् गुटिकाभूतम्, स्वर्जिःक्षारः, यवक्षारो यावशूकः, ऊषक्षार ऊषकः, ऊषरमृतिकापङ्क[1] इत्येके। गन्धको लेलीतकः ॥ ९४ ॥

कुसुम्भकुलत्थौ धान्यविशेषौ, क्षारकूपाम्बु क्षाररसं कूपोदकं, शुक्तं चुक्रं, तल्लक्षणम्—

"यन्मद्यादि[2] शुचौ भाण्डे सक्षौद्रगुडकाञ्जिकम्,
धान्यराशौ त्रिरात्रिस्थं शुक्तं चुक्रं तदुच्यते ॥" इति ॥

आदिशब्देन मधूकपुष्पजादिग्रहणम्। उक्तञ्च—

मधूकपुष्पेक्षुरसगुडपीलुफलादिभिः।
साधितं जातमत्यम्लं शुक्रं चुक्रञ्च तन्मतम् ॥ इति ॥

फलादीन्यभिषूयन्ते सस्नेहलवणानि यत्।
तदाहुः शुक्तमपरे सन्धानाभिषुताभिधम् ॥
मद्ये दत्ते जलस्थाने मद्यशुक्तं तदेव तु।
मधुशुक्तं तु माध्वीके गुडशुक्तं गुडोदके ॥
इक्षुशुक्तं चेक्षुरसे इत्थमन्यानि कल्पयेत्। इत्येके ॥

सर्वं पञ्चरसं मद्यं कालान्तरवशाद्यदा।
व्यक्तान्यरसमम्लत्वं याति शुक्तं तदोच्यते ॥ इत्यन्ये।

मद्यं द्राक्षादिसाधनम्। उक्तं चाष्टाङ्गसंग्रहे :—

द्राक्षेक्षुमाक्षिकं शालिरुत्तमा व्रीहिपञ्चमः।
मद्याकरा यदेभ्योऽन्यत्तन्मद्यप्रतिरूपकम् ॥ इति ॥

मूत्रं गोमूत्रं, काञ्जिकं धान्याम्लं, सौवीरं गोधूमकाञ्जिकम, निस्तुषं यवकाञ्जिकमित्येके, तुषोदकं यवकाञ्जिकम् ॥ ९५ ॥

खलः काम्बिलिको गोरसेन विपाचितौ; गोरसं तक्रम्, मूलकादीनामगरुसारान्तानां तैलम्। तत्र मूलकं हरितपर्णम्, जीमूतो देवदाली, कुटजो वत्सकः, अर्को रूपिका, करञ्जो नक्तमालः ॥ ९६ ॥

विडङ्गं वेल्लं, क्ष्वेडः कोशातकी, कोशाम्रं लाक्षावृक्षः, तुम्बी अलाबुः, सर्षपः सिद्धार्थः, शिग्रुः सौभाञ्जनकः, ज्योतिष्मती कङ्गुणिका,

१. पाक[1]
२. मस्त्वादि[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इङ्गुदी तापसतरुः, पार्था आदित्यभक्ता, पृथ्वीका वाष्पिका, कृष्णजीरकमित्येके; हस्तिकर्णो रक्तैरण्डः, महापर्णो भूशाल इत्यन्ये ॥ ९७ ॥

अरुष्करो भल्लातः, तुम्बरको व्याख्यातः, प्रवन्ती शम्बरी, सप्तला चर्मसाह्वा, नीलिका कालाञ्जनी, शङ्खिनी यवतिक्ता, श्यामा श्याममूला त्रिवृत्, वृद्धदारुक इत्येके; दन्ती निकुम्भः; कम्पिल्लो रक्तवर्णः, पीलुस्तीक्ष्णतरुः ॥ ९८ ॥

देवाह्वं देवदारुः, चीडा सरलः, गम्भीरः सारतरुविशेषः, केचिद् गण्डीरं पठित्वा शिरीषं व्याचक्षते। शिंशिपा कृष्णसारः, अगरु जोङ्गकः। एषु मूलकादीनां बीजानि, देवाह्वादीनां सारः। एतत्सर्वं श्लेष्मानिलघ्नं पित्तकरञ्च। बिल्वो मालूरः, पत्तूरो लोहमारकः, अर्जक प्रसिद्धः ॥ ९९ ॥

आर्द्रकं रेणुका मध्यवार्ताकश्चाम्लदाडिमम्।
शुष्के कोलकणे वङ्गकासीसे सीधुराक्षिकः ॥ १०० ॥
तद्वच्छिग्रुफलं चौतो रसः स्नेहोऽल्पपित्तलः ॥

॥ इति कफवातघ्नवर्गः ॥

आर्द्रकं शृङ्गवेरं, रेणुका कौन्ती, मध्यवार्ताकं मध्यं नातिकोमलं नातिजरठं, अम्लरसं दाडिमीफलं, शुष्के कोलकणे; कोलं बदरं, कणा पिप्पली, वङ्गकासीसे कासीसत्रपुणी, सीधुराक्षिकः आक्षिको बिभीतकत्वक्कृतः, आक्षिक्या सुरया कृत इति **जैज्जटः**। एतत्सर्वं श्लेष्मानिलघ्नं पित्तोदासीनञ्च ॥ १०० ॥

शिग्रुफलं श्वेतमरिचं, चौतो रसः सहकारफलवृन्तनिर्यासः चौतःस्नेहः सहकारफलभवं तैलम्, एतत्त्रयं तद्वत् कफवातघ्नम् अल्पपित्तलः किंचित्पित्तलः ॥

॥ इति वोपदेवीये सिद्धमन्त्रप्रकाशे कफवातघ्नवर्गः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

॥ अथ कफपित्तघ्नवर्गः ॥

कफपित्तहरं जम्बूः खदिरस्तिनिशोऽसनः ॥ १०१ ॥
पिप्पलोदुम्बरवटपिप्पली[1]गर्दभाण्डकाः ।
कोविदाराम्रकोशाम्रप्रियालाङ्कोलशल्लकी- ॥ १०२ ॥
करञ्जशेलुकम्पिल्लकिङ्किरातविकङ्कताः ।
रोध्रार्जुनबलामोटाभूर्जपिण्डीतकार्गटाः ॥ १०३ ॥
श्वेतचन्दनपत्तङ्गद्रेक्काविवृद्धवत्सकाः ।
काकोदुम्बरिका पूगः कतकष्टिण्टुको धवः ॥ १०४ ॥
पटोली कारवल्लीन्द्रवारुणी क्षीरमोरटः ।
गुञ्जा-मेदोगला-लज्जा-कूर्चपर्णी-दुरालभाः ॥ १०५ ॥
काकजङ्घा निशा मुस्ता त्रायन्ती पुण्डरीयकः ।
बालकं कट्तृणं दूर्वा दर्भो मरुवको नलः ॥ १०६ ॥
वंशो बर्हिशिखा देवगन्धा ब्रह्मसुवर्चला ।
हिलमोची चर्मरङ्गा विषमुष्टचेलवालुकम् ॥ १०७ ॥
शणपुष्पी हेमदुग्धा तिरिगिच्छिश्च माचिका ।
लाक्षा जतुकरी पुष्पं वृकपुन्नागचम्पकात् ॥ १०८ ॥
पाटलार्काब्जिनीनिम्बलवङ्गबकुलासनात् ।
निर्गुण्ड्याःमूलकाम्मोदात् केशरं पद्मनागयोः ॥ १०९ ॥
आरण्यं त्रपुसं[2] बालवार्ताकं तालजोऽङ्कुरः ।
ताम्रं रीतिर्वर्तलोहं कांस्यगैरिकहिंगुलाः ॥ ११० ॥

---

१. पिप्परी[3]
२. अरण्यत्रपुसं[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शङ्खांजनाब्धिफेनालसौराष्ट्रीयासशर्कराः ।
शाल्यादि च्छिन्नजं लाजा मथितं धान्ववैकरे ॥ १११ ॥
जले पलाशकाश्मर्यतैलं यूषस्तु मुद्गजः ।
पटोलजो मूलकजो निम्बामलकजावपि ॥ ११२ ॥

प्र०—जम्बूः महास्कन्धा, खदिरो गायत्री, तिनिशो स्यन्दनः, असनो बीजकः ॥ १०१ ॥

पिप्पलोऽश्वत्थः, उदुम्बरः कृमिफलः, वटो न्यग्रोध, पिप्पली प्लक्षः, गर्दभाण्डकः छायावृक्षः, कोविदारः कचनारिः[1], आम्रः चूतः, कोशाम्रो लाक्षावृक्षः, प्रियालः चारः, अङ्कोलोऽकोटः, शल्लकी गजभक्ष्या ॥ १०२ ॥

करञ्जो नक्तमालः, शेलुः श्लेष्मान्तकः, कम्पिल्लो रक्तवर्णः, किङ्किरातः किंकिराडः, विकङ्कतः स्रुवतरुः, रोध्रः तिल्वकः, अर्जुनः ककुभः, बला नागबला, मोटा जयन्ती, भूर्जो लेख्यपत्रः, पिण्डीतकः पिण्डारकः, अर्गटः आर्तगलः ॥ १०३ ॥

श्वेतचन्दनं शुक्लश्रीखण्डम्, पतङ्गं पट्टरङ्गम्, द्रेका महानिम्बः, अविवृक्षो मेषशृङ्गी, वत्सकः कुटजः, काकोदुम्बरिका फल्गुः, पूगः क्रमुकः, कतकोऽम्बुप्रसादनफलः, टिण्टुकोऽरलुः, धवः शकटाक्षः ॥ १०४ ॥

पटोली राजीफला, कारवल्ली सुषवी, इन्द्रवारुणी विशाला, क्षीरसोरटो कोटरमुखः, गुञ्जा काकणन्ती, मेदोगला मृगदन्ती, लज्जा नमस्कारी, कूर्चपर्णी मेढवल्ली, दुरालभा यवासिका ॥ १०५ ॥

काकजङ्घा ध्वाङ्क्षजङ्घा, निशा हरिद्रा, मुस्ता गाङ्गेयी, त्रायन्ती त्रायमाणा, पुण्डरीयकः प्रपौण्डरीकः, बालकं ह्रीवेरं, कट्तृणं ध्यामं, दूर्वा शाद्वलं, दर्भः कुशः, मरुवकः खरबुकः, नलो देवनलः ॥ १०६ ॥

वंशो वेणुः, बर्हिशिखा मयूरशिखा, देवगन्धा आरामशीतला, ब्रह्मसुवर्चला मण्डूकपर्णी; हिलमोची जलब्राह्मी, चर्मरङ्गा आर्वतकी, विषमुष्टिः केशमुष्टिः, एलवालुकमैलेयम् ॥ १०७ ॥

---

१. काञ्चनः[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शणपुष्पी घण्टारवः, हेमदुग्धा स्वर्णक्षीरी, तिरिगिच्छिः कण्टककरञ्जः, माचिका माचिकं, लाक्षा जतु, जतुकरी चक्रवर्त्तिनी, वूकादीनां मोक्षान्तानां पुष्पम् । तत्र वूक[1]ः ईश्वरमल्लिका, पुन्नागः पाटलपुष्पम्, चम्पकश्चाम्पेयः ॥ १०८ ॥

पाटला वसन्तदूती, अर्को रूपिका, अब्जिनी पद्मिनी, निम्बः पिचुमन्दः, लवङ्गश्चन्दनपुष्पः, बकुलो मद्यदोहदः, असनो बीजकः, निर्गुण्डी सिन्दुवारः, मूलकं हरितपर्णम्, मोक्षो मुष्ककः, केशरं पद्मनागयोः; पद्मं कमलम्, नागं नागपुष्पं तयोः केसरं किञ्जल्कम् ॥१०९॥

आरण्यं त्रपुसं वनवालुकं, बालवार्त्ताकं कोमलवृन्ताकं, तालजोऽङ्कुरस्तालस्याभिनवोद्भेदः, ताम्रं शुल्वं, रीतिः ब्रह्मरीति, वर्तलोहम्आरकूटम्, कांस्यं घोषं, गैरिकं रक्तपाषाणः, हिंगुलो दरदः ॥११०॥

शङ्खः कम्बुः, अंजनं आलांजनादिः, अब्धिफेनः समुद्रफेनः, आलं हरितालं, सौराष्ट्री तुवरी मृत्, यासशर्करा दुरालभोद्भवा शर्करा, शाल्यादि छिन्नजं प्ररूढं शाल्यादिधान्यं, लाजा भृष्टधान्यानि, मथितं दधिविकारः, धान्ववैकरे जले धान्वं जांगलदेशस्थं वैकरं विकरस्थं विकरो वालुकां विकीर्य कृतो जलाशयस्तद्स्थे जले, पलाशः किंशुकः, काश्मर्यं श्रीपर्णी, तयोस्तैलं किंशुककाश्मर्ययोर्बीजतैलम् । मुद्गजाद्यो यूषाः, मुद्गः शिंबिधान्यमुख्यः, पटोलं राजीफलं, मूलकं हरितपर्णं, निम्बः पिचुमन्दः, आमलकं धात्रीफलम्, पटोलादीनां मुद्गादिसहितानां यूषाः कार्याः, तैर्विना यूषत्वाभावात् ॥ एतत्सर्वं श्लेष्मपित्तघ्नम् ॥ १११-११२ ॥

वातकृत्कफपित्तघ्नं करञ्जीनिम्बपद्मकाः ।
गजद्रुमागस्त्यरुष्काः कुतिन्दुः कटुका त्रिवृत् ॥ ११३ ॥

द्रवन्ती-सप्तला-दन्ती-वासा-भूनिम्ब-पर्पटाः ।
नदीभल्लात-गोजिह्वा-कुचैला-वृषगन्धिकाः ॥ ११४ ॥

कठिल्लको गराडदूर्वा क्षीरावी काल्यकस्तथा ।
शाकं कलम्बुनाडीचमूर्वाकम्पिल्लकेम्बुकात् ॥ ११५ ॥

---

१. घूकः[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लाङ्गलीसूरणौरण्डाब्जिनीबिम्बीकलायतः ।
पुष्पं करीरकाश्मर्यपलाशाग्र्वधदत्सकात् ॥११६॥
शाल्मली-काश्चनागस्तिद्वणारोध्राटरुषकात् ।
फलपत्रे वटाश्वत्थवट्युदुम्बरवेतसात् ॥११७॥
शिरीषाद् गर्दभाण्डाच्च फलं पर्पटकीधवात् ।
वनतिक्ताक्षकीजम्बूबिम्बीतिन्दुकटङ्कतः ॥११८॥
बलाप्रियङ्ग्वश्वकर्णादीनकीबकुलादपि ।
राजालाबोः कोशवत्याः लवल्याः शुष्कपूगकम् ॥११९॥
श्लेष्मान्त[1]चिर्भिटे बाले नेपालो दीर्घपत्रकः ।
सूचीपत्रो नीलपोरो लोहं लोहमलस्तथा ॥१२०॥
शाल्यादि स्थलसंभूतं सक्तुर्भक्ष्याश्च सूप्यजाः ।
मङ्गल्यको राजमाषो मकुष्ठककलायकौ ॥१२१॥
सतीनस्त्रिपुटाढक्यौ मसूरश्चणकस्तथा ।
हरेणुश्चेत्यादिशमीधान्यं नन्दीमुखी तथा ॥१२२॥
श्यामाकः शान्तनुः कङ्गुः मधूली कोद्रवो यवः ।
सरित्तुषारकूपाम्बु मधुनी क्षौद्रदालिके ॥१२३॥
शतपत्रो भृङ्गराजः कोयष्टिर्जीवजीवकः ।
बभ्रुः खञ्जनहारीतौ दुर्नासा गिरिशा जटी ॥१२४॥
लट्वा लट्वषो गोक्ष्वेडः सारङ्गी वटहा पिकः ।
कुलिङ्गः सुगृहा लोहपृष्ठः फाकारदुन्दुभी ॥१२५॥
ऋतुयष्टिडिण्डिमाणश्चिरण्डो[2] शुकसारिका ।
मञ्जुलीयकदात्यूहगोपापुत्रप्रियात्मकाः ॥१२६॥

---

१. श्लेष्मात[3]
२. शिम्बी[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कुम्भस्कृतः पाराविकः कोशकैरातकर्पराः ।
वल्गुली-कलविङ्काग्निचूडाद्याः प्रतुदाः खगाः ॥१२७॥

प्र०—करञ्जी उत्तुण्डकी, निम्बः पिचुमन्दः, पद्मकः पद्मकाष्ठम्, गजद्रुमो लताश्वत्थः, अगस्तिरगस्तिद्रुमः, अरुष्को भल्लातः, कुतिन्दुः काकतिन्दुः, कटुका कटुरोहिणी, त्रिवृत्कुम्भः ॥ ११३ ॥

द्रवन्ती शम्बरी, सप्तला चर्मसाह्वा, दन्ती कुम्भः; वासाटरूषः, भूनिम्बः किराततिक्तकः, पर्प्पटः पर्प्पटकः, नदीभल्लातो जलभल्लातः, गोजिह्वा दर्विपत्रिका, कुचैला पाठाभेदः, वृषगन्धिका बस्तगन्धा ॥ ११४ ॥

कठिल्लकः पुनर्नवाभेदः, गण्डदूर्वा गण्डाली, क्षीरावी दुग्धिका, काल्यको गन्धकर्चूरः, कलम्बादीनां कलायान्तानां शाकम् । तत्र कलम्बुर्नालिकः; नाडीचो नाडिका । तयोर्लक्षणम्—

कलम्बुर्नालिकः स्वादुः सुषिरो बहुतोयजः ।
तद्भेदो नालिका श्लक्ष्णा ज्ञेया सान्या कलम्बुका ॥ इति ॥

मूर्वा मधुरसा, कम्पिल्लो रक्तवर्णः, केम्बुकं पेचुका ॥ ११५ ॥

लाङ्गली कलिहारी, सूरणश्चित्रदण्डः, एरण्डः पञ्चाङ्गुलः, अब्जिनी पद्मिनी, बिम्बी तुण्डिकेरी, कलायो रूढपत्रकः, करीरादीनामाटरूषकान्तानां पुष्पम् । तत्र करीरो गूढपत्रः, काश्मर्यः श्रीपर्णी, पलाशः किंशुकः, आर्ग्वधः शम्याकः, वत्सकः कुटजः ॥११६॥

शाल्मली तूलिनी, काञ्चनः कोविदारः, अगस्तिः अगस्तिवृक्षः, क्षणो मातुलानी, रोध्रकस्तिल्वकः, आटरूषको वासकः, वटादीनां गर्दभाण्डान्तानां फलपत्रे । तत्र वटो न्यग्रोधः, अश्वत्थः पिप्पलः, वटी पिप्पली, उदुम्बरः कृमिफलः, वेतसो वञ्जुलः ॥ ११७ ॥

शिरीषः शुकतरुः, गर्दभाण्डः छायावृक्षः । पर्प्पटक्यादीनां फलम् । तत्र पर्प्पटी प्रसिद्धा, धवः शकटाक्षः, वनतिक्ता तिक्तपटोली, आक्षिकी प्रसिद्धा, जम्बूर्महास्कन्धा, बिम्बी तुण्डीकेरी, तिन्दुको विरली, टङ्को मन्मथद्रावणः[1] ॥ ११८ ॥

१. मन्मथोद्भावनः[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बला वाट्यालकः, प्रियङ्गुर्गन्धप्रियङ्गुः, अश्वकर्णः सस्यसंवरः, दीनकी आशीतकः, बकुलो मद्यदोहदः, राजालावुः मधुरालाबुः, कोशवती कोशातकी, लवली—

घनस्निग्धहरित्प्रान्तप्रपुन्नाटसदृक्छदा ।
सुगन्धिमूला लवली पाण्डुकोमलवल्कला ॥ इत्युक्ता ॥

शुष्कपूगं शुष्कक्रमुकफलम् ॥ ११९ ॥

श्लेष्मान्तं शेलुफलं, चिर्भिटं डङ्गरं, नेपालादयश्चत्वार इक्षवः । नेपालो नेपालदे[1]शजः, दीर्घपत्रो आयतपर्णः, सूचीपत्रस्तीक्ष्णाग्रपर्णः, नीलपोरोऽसितपर्वा, लोहमलो मण्डूरम् ॥ १२० ॥

शाल्यादि स्थलजं शाल्यादिधान्यं, सक्तुः भृष्टयवादिचूर्णम्, भक्ष्याश्च सूप्यजाः मुद्गादिकृता भक्ष्याः, मङ्गल्यादिहरेण्वन्तं शिंबिधान्यम् । तत्र मङ्गल्यः पाण्डुरो मसूरभेदः, राजमाषश्चवलः, मकुष्ठको मयूरपृष्ठकः, कलायो वर्तुलः, सतीनो महान् कलाय[2]भेदः, त्रिपुटो लांकः, आढकी तुवरी, मसूरी मसूरः, चणको हयप्रियः, हरेणुः स्वल्पकलायभेदः । आदिशब्दादन्येप्येवंविधाः । नन्दीमुख्यादीनि यवान्तानि धान्यानि । तत्र नन्दीमुखी नोदुहिका, नन्दीवक्त्रेति **जैज्जटः**, निःशूकयवकेति[3] **वाष्पचन्द्रः** ॥ १२२ ॥

श्यामाकस्तृणबीजः, शान्तनुः शान्तिकरः, कंगुः प्रियंगुः, मधूली मर्कट इति **जैज्जटः**, स्वल्पो गोधूम इति **वाष्पचन्द्रः** । कोद्रवः कोरदूषः, यवस्तीक्ष्णशूकः, सरित्तुषारकूपाम्बु; सरिन्नदी, तुषारोऽवश्याय, कूपः प्रसिद्धः तेषाम्बूदकम्, मधुनी क्षौद्रदालिके तयोर्लक्षणम्—

"मक्षिकाः पिङ्गलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
कपिलं शीतलं तद्धि क्षौद्रमित्युच्यते बुधैः ॥"

"मधुराम्लकषायन्तु दालं पत्रोपरि स्थितम् ॥" इति ॥ १२३ ॥

---

१. आशीतरुः[1]

२. महाकलाय[1]

३. निःशूकयवकेति स्वल्पो गोधूमभेद.[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शतपत्रादयोऽग्निचूडाद्यन्ताः प्रतुदाः खगाः । प्रतुद्य भक्षयन्तीति प्रतुदाः । तत्र शतपत्रो राजशुकः । भृङ्गराजः—

"स्याद् भृङ्गराजः भ्रमरोऽञ्जनाभो वनप्रियः कालवटाभिधानः ।
गोप्रेरकौऽसौ बहुधा विरावी स चूडशीर्षः प्रतुदः पतत्री ॥"

इत्युक्तः ॥

कोयष्टिः टिट्टिभः, जीवञ्जीवको विषदर्शनग्लानिः, बभ्रुः कपिलवर्णः, हारीतो हरितपीतवर्णः, दुर्नासा दुष्टनासा, गिरिशा पर्वतशायिनी, जटी जटावान् ॥ १२४ ॥

लट्वा पेचांकोऽतिरिक्तपुष्टाधोभागः[५] । भारद्वाजो मेदोलताख्यः इत्येके ।

"लटूषः लटुषो लट्टो लटूषक इति स्मृतः ।
खारणादिवर्णपक्षः लट्वाको ललटूयकः ॥ इति

लोके प्रसिद्धः खादिरपक्षः ।

"सन्धानचञ्चवा कृतचञ्चुलांगः सदीर्घपुच्छः प्रतुदो विहङ्ग"

इत्युक्तः । गोक्ष्वेडो गोनर्दभेदः, सारङ्गश्चातकः, वटहा वटघाती, पिकः कोकिलः, कुलिंगश्चटकः, सुगृहा[१] पीतमस्तकः लोहपृष्ठः कङ्कभेदः, फाकारः फाट्शब्दानुकारी, दुन्दुभिः दुन्दुभिनादः ॥ १२५ ॥

क्रतुयष्टिः यज्ञहा, डिण्डिमाणो डिण्डिभवदुत्कटध्वनिः, चिरण्टी[२] चिरण्टका, शुकः कीरः, सारिका प्रियवादिनी, मञ्जुलीयको मंजुलनादः, दात्यूहः टिट्टिभवर्णः, कालकण्ठः अन्धकाक इत्येके, गोपीपुत्रः गोपालकः, प्रियात्मकः त्रपुरञ्जकः, ॥ १२६ ॥

कुम्भस्कृत[४] इति विरावः, पाणविकः पणवद्ध्वनिः, कोशः पत्रचरकः, कैरातः किरातप्रियः, कर्परः कपालाभः, वल्गुली वक्त्रविष्ठाविनिर्गमा, कलविङ्कश्चरकभेदः, अग्निचूडो अग्निवर्णशिखः, आदिशब्दादन्येऽप्येवंविधाः । एतत्सर्वं मारुतकरं श्लेष्मपित्तहरञ्च ॥ १२७ ॥

---

१. सुग्रहा[3]
२. चिरीटी[3]
३. जा.[3]
४. कुम्भकृतः[3]
५. पुच्छाघोभागः[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अवातं कफपित्तघ्नं तिलपर्ण्युष्णसुन्दरः ।
भव्यं करीरं कर्कोटं कारवेल्लं विभीतकम् ॥ १२८ ॥
कदलीकन्दवेत्राग्रौ मधुमण्डसिते मधु ।
झराम्बुशशभस्माङ्गपारावतकपिञ्जलाः ॥ १२९ ॥
तद्वत्तण्डुलीयभार्ङ्गीशाको मुद्गोऽल्पवातलः ।

प्र०—तिलपर्णी बर्बरकः, उष्णसुन्दरो ग्रीष्मसुन्दरः, भव्यादीनि पञ्च फलानि । तत्र भव्यं कर्मरङ्गम्, करीरं गूढपत्रकं, कर्कोटं कर्कोटीफलम्, कारवेल्लं कारेलम्, विभीतमक्षम् ॥ १२८ ॥

कदलीकन्दो रम्भाकन्दः, वेत्राग्रं वेत्रस्याग्रजोद्भेदः, मधुमण्डो मधुनोऽच्छो[1]भागः, मधुसिता मधुशर्करा । अयन्तु विशेषः कालपाकात्यक्तद्रवत्वं मधु शर्करावद्भवति । मधु माक्षिकम्, झराम्बु निर्झरोदकम्, शशो मृगविशेषः, भस्माङ्गादयः पक्षिणः । तत्र भस्माङ्गः कपोतः, पारावतो नरप्रियः, कपिञ्जलो गौरतित्तिरिः, एतत्सर्वं कफपित्तघ्नं वातोदासीनम् ॥ १२९ ॥

तद्वत्तण्डुलीयो भार्ङ्गीशाको मुद्गोऽल्पवातलः । तण्डुलीयस्तण्डुलीयशाकः, भार्ङ्गीशाको द्विजयष्टिशाकः, मुद्गः प्रसिद्धः, एते त्रयस्तद्वत् कफपित्तघ्ना, अल्पवातलाः किञ्चिद्वातलाः ॥

॥ इति वोपदेवीये सिद्धमन्त्रप्रकाशे कफपित्तघ्नवर्गः ॥

—: ० :—

१. मधुमन्थनोत्थो[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

॥ अथ दोषघ्नवर्गः ॥

दोषघ्नं काश्मरी वन्दा शिरीषार्ग्वधवञ्जुलाः ॥ १३० ॥
तुन्यशोकौ सप्तपर्णापलाशाश्मघ्नपाटलाः ।
किणिही सारिवा पाठा मूर्वा सोमः प्रसारिणी ॥ १३१ ॥
तुम्बर्यद्रिकर्णी वासन्ती जीवन्ती शङ्खिनी विषा ।
गुडूच्यम्लानातिमुक्ता मुञ्जस्तामलकी बला ॥ १३२ ॥
सहदेवाम्बुकृष्णेभबलाकासघ्नकङ्कताः ।
कामाता बाकुची ब्राह्मी चिल्ली जीवन्तवास्तुकौ ॥ १३३ ॥
सतीनः मर्मरी सूषाशाकं राजक्षवः शटी ।
सुनिषण्णोऽङ्कुरो वर्याः शुष्कं बालश्च मूलकम् ॥ १३४ ॥
स्पृक्का स्थौणेयतगरदमनो[1]शीरकुङ्कुमम् ।
जाती मांसी शङ्खपुष्पी तरणी कुन्दधान्यकम् ॥ १३५ ॥
शालिपर्णी पृश्निपर्णी[2] गोक्षुरो वृषसारकः ।
फलं धात्र्यभयाक्षीरिशताक्षकविकङ्कतात् ॥ १३६ ॥
पटोलनिम्बकुटजकेतकीसरहेङ्गुदात् ।
पक्वं कपित्थकूष्माण्डप्राचीनामलनीपतः ॥ १३७ ॥
स्विन्नपूगं स्वादु तिक्तं पीलु, स्वादु च दाडिमम् ।
बोलो राला सिह्लसिन्धुसूतस्वर्णाभ्रमाक्षिका: ॥ १३८ ॥
रक्तशालिर्महाशालिः कलमः शकुनाहृतः ।
दीर्घशूको रोध्रशूकस्तूर्णाकः शङ्खमौक्तिकाः ॥ १३९ ॥

---

१. दमनतगरो[3]
२. पृष्टिपर्णी[1] ।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लाङ्गलः कर्दमो लोहवालो महिषमस्तकः ।
पुण्ड्रः पाण्डुः पुण्डरीकः प्रमोदो गौरसारिवौ ॥ १४० ॥
सारामुखः शीतभीरुस्तपनीयः सुगन्धिकः ।
पुष्पाण्डको दीर्घनालो महाद्दूषकदूषकौ ॥ १४१ ॥
पत्तङ्गकः काञ्चनको हायनाद्यास्तु शालयः ।
गौरो महान् कुरुबकः प्रमोदोऽसनपुष्पकः ॥ १४२ ॥
मुकुन्दः कालकः पीतः केदारश्चूर्णकङ्गुकौ ।
इत्याद्याः षष्टिका व्रीहिर्महान् कृष्णो जतूमुखः ॥ १४३ ॥
सारामुखस्त्वरितको लावाक्षश्चीनशूकरौ ।
पारावतः कुकुटाण्डोज्जालशारददर्दुराः ॥ १४४ ॥
कुरुविन्दो नन्दमुखोद्दालौ वरकगन्धनौ ।
वार्यन्तरिक्षं यद् गाङ्गं सामुद्रमपि चाश्विनम् ॥ १४५ ॥
भौमं देशे सिते कृष्णे नीले साधारणे शुचौ ।
पृथौ चेन्द्वर्कपवनैः स्पृष्टं यदरसं तु यत् ॥ १४६ ॥
यदूर्ध्वं शारदं यच्च पारियात्रनदीभवम् ।
यत्स्वादु कौपं यत्पादशेषं यच्छृतशीतलम् ॥ १४७ ॥
यत्तप्तमृज्जतुस्वर्णरूप्याश्माकांश्मतापितम् ।
धारोष्णदुग्धं दधि तु धात्रीयुक् पाकिमं मधु ॥ १४८ ॥
स्त्र्यजाक्षीरादि जीर्णाज्यं घृतमण्डः कृतो रसः ।
शूल्यामिषं भक्तमण्डस्तैलं यद्यावतिक्तकम् ॥ १४९ ॥
मंथः स्नेहमधुद्राक्षेक्षुरसाम्लसितागुडैः ।
युक्तो यूषस्त्वामलकदाडिमैर्लावतित्तिरी ॥ १५० ॥
हरिणैणान्यङ्कुखड्गशल्यक—मृगमातृकाः ।
अदोषं दधि सक्षौद्रं हिमांभो रागखाडवौ ॥ १५१ ॥

॥ इति दोषघ्नवर्गः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्र०—काश्मरी श्रीपर्णी, वन्दा कामवृक्षः, शिरीषः शुकतरुः, आरग्वधः शम्याकः, वञ्जुलो वेतसः ॥ १३० ॥

तुनी नन्दीवृक्षः, अशोकस्ताम्रपल्लवः, सप्तपर्णः सप्ताह्वः, पलाशः किंशुकः, अश्मघ्नः पाषाणभेदः, पाटला वसन्तदूती, किणिही शिरीषपत्रा, सारिवा गोपर्णी, पाठा वृकतिक्ता, मूर्वा मधुरसा, सोमः सोमपर्णी[1], प्रसारिणी सुप्रसरा ॥ १३१ ॥

तुम्बी अलाबूः, अद्रिकर्णी सूर्पिका, वासन्ती प्रहसन्ती, जीवन्ती जीवनी, शङ्खिनी यवतिक्ता, विषातिविषा, गुडूची छिन्नरुहा, अम्लानो अम्लानकः, अतिमुक्ता माधवी, मुञ्जः शरः, तामलकी भूम्यामलकी, बला वाट्यालकः ॥ १३२ ॥

सहदेवा दण्डोत्पला, अम्बुकृष्णा जलपिप्पली, इभबला नागबला, कासघ्नः कासमर्दः, कङ्कताऽतिबला, कामाता काकमाची, बाकुची सोमवल्ली, ब्राह्मी ब्रह्ममण्डूकी, चिल्ली प्रसिद्धा, जीवन्तो रक्तनालः, वास्तुकः कण्टकवास्तुकम् ॥ १३३ ॥

सतीनादीनां त्रयाणां शाकम्। तत्र सतीनो महान् कलायभेदः, विष्णुक्रान्तेत्येके। मर्मरी प्रसिद्धा, सूषा बृहत्पत्रा, कासमर्दभेदोऽयं केदारे पूर्यते, शिग्रुस इत्येके; राजक्षवो राजसर्षपः, दुग्धिकेत्येके शटी कर्चूरः, सुनिषण्णश्चतुर्दलः

"शाको जलान्विते देशे चतुःपत्रीति कीर्त्तितः"

इत्युक्तः। अङ्कुरो वर्याः शतावर्यंकुरः, शुष्कं बालञ्च मूलकम् शुष्कं मूलकं बालं मूलकञ्च ॥ १३४ ॥

स्पृक्का स्पृक्, स्थौणेयं शीर्णरोमकं, दमनः पाण्डुरङ्गः[2], तगरं वक्त्रं, उशीरं वीरणकं, कुंकुमं बाह्लीकं, जाती मालती, मांसी जटिला, शंखपुष्पी कम्बुमालिनी, तरणी रामतरणी, कुन्दो माघ्यः, धान्यकं कुस्तुम्बुरी ॥ १३५ ॥

शालिपर्णी स्थिरा, पृश्निपर्णी पृथक्पर्णी, गोक्षुरः श्वदंष्ट्रा, वृषसारकः कौण्डिन्यकः, धात्र्यादीनामिङ्गुदान्तानां फलम्। तत्र धात्री आमलकी, अभया हरीतकी, क्षीरी राजादनः, शताक्षकं वारड्यां सदावस्थामिति ख्यातम्, विकंकतः स्रुवतरुः ॥ १३६ ॥

---

१. पक्षपर्णी[2]

२. राग.[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पटोलो राजीफलः, निम्बः पिचुमन्दः, कुटजो वत्सकः, केतकी तृणशून्यं, सरहा राजजम्बूः, इंगुदस्तापसवृक्षः, कपित्थादीनां नीपान्तानां पक्वं फलम् । तत्र कपित्थो दधित्थः, कूष्माडं पुष्पफलं, प्राचीनामलकी पानीयामलकम्, नीपो राजकदम्बः ॥ १३७ ॥

स्विन्नपूगं स्विन्नक्रमुकफलं, स्वादु तिक्तं पीलु मधुरतिक्तरसं पीलुफलं, स्वादु दाडिमं मधुरं दाडिमफलं, बोलो गंधरसः, राला सर्जरसः, सिह्लस्तुरुष्कः, सिन्धु सैन्धवं, सूतः पारदः, स्वर्णं सुवर्णं, अभ्रं अभ्रकम्, माक्षिकस्ताप्यधातुः ॥ १३८ ॥

रक्तशाल्यादयो हायनाद्यन्ताः शालयः ।

"शीतोष्णवर्षजाः शालिषष्टिकव्रीह्यो मताः ।
अकंडितश्वेतगर्भपाण्डुकंडितपाण्डुराः ॥"

इति शाल्यादीनां भेदाः । तत्र रक्तशालिः लोहितशूकः, महाशालिर्महातण्डुलः, कलमोऽन्तर्वेद्यां कलम्बिरिति ख्यातः । शकुनाहृतः—

"द्वीपान्तरात् समानीतो गरुडेन महात्मना ।
शकुनाहृतशालिः स्याद् गरुडापरनामकः" ॥

इत्युक्तः उत्तरकुरोः हंसैरानीतः । सोऽवन्त्यां चक्र इति, मगधे पाशक इति ख्यात इत्येके । दीर्घशूकः आयतशूकः, रोध्रशूको लोध्रपुष्पाकारशूकः, तूर्णः शीघ्रपाकी, आश्वयुज इति काश्मीरे, शंखमौक्तिकः शङ्खाकारशूको मुक्ताकारतण्डुलः, द्वावेतौ इत्येके ॥ १३९ ॥

लाङ्गलः सीरकृष्टभूमिजः, कर्दमः पङ्किलभूमिजः, लोहवालः कठिनतण्डुलः, महिषमस्तकः तौलिकः तेलासीति मध्यदेशे । पुण्ड्रः प्रपौण्डरीकाभः, पाण्डुः पाण्डुतुषः पाण्डुशूकश्च; पुण्डरीकः श्वेतोत्पलाभ; प्रमोदः प्रह्लादक; गौरो हरिद्राभः, सारिवः सारिवासदृशः ॥ १४० ॥

सारामुखः कृष्णमुक्ताकारतण्डुलः, शीतभीरुर्यो बहुना शीतेन निष्पाद्यते । तपनीयोऽल्पेन शीतेन निष्पाद्यते । सुगन्धिको गन्धिशालिः, पुष्पाण्डः पुष्पवत्सुरभिः सुकुमारतण्डुल; दीर्घनालः आयतनालः, महादूषको महामदकारी, दूषको मदकारी ॥ १४१ ॥

पत्तङ्गः कुंकुमकः, काञ्चनकः सुवर्णशालिः, हायनः शङ्कुवाकः, घोटकपुच्छ इति **जैज्जटः** । आदिशब्दादन्येऽप्येवंविधाः । गौराद्याः कङ्गुकान्ताः षष्टिकाः । तत्राद्यो गौरः, महत्प्रमोदपीतचूर्णकङ्गुकाः

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गौरकङ्कुकाः। शेषाः कृष्णाः। तत्र गौरो गौरषष्टिकः, महान् महाषष्टिकः। कुरुबकः कुरुबककुसुमाकारशूकः, प्रमोदः प्रह्लादकः, असनपुष्पकोऽसनपुष्पाकारशूकः ॥ १४२॥

मुकुन्दो मुकुन्दप्रियः, कालकः कालवर्णः, पीतः किञ्चित्कृष्णोऽतिगौरः, केदारः प्रचुरोदकेन जातः[1], चूर्णः सूक्ष्मतण्डुलः, कङ्गुकः कङ्गुसदृशः, इत्याद्याः अन्येऽप्येवंविधाः। महदादयो गन्धनान्ता व्रीहयः। तत्र महान् महातण्डुलः, कृष्णः कृष्णतुषतण्डुलः, जतूमुखो लाक्षाभमुखः ॥ १४३ ॥

सारामुखः सारिकाचञ्च्वाभतण्डुलः, त्वरितः शीघ्रपाकी, लावाक्षो लावनेत्राभतण्डुलः, चीनश्चीनफलबीजाभतण्डुलः, शूकरः शूकरवर्णपुष्पतण्डुलः, कुक्कुटाण्डः कुक्कुटाण्डाभतण्डुलः, उज्जालो य ऊर्ध्वं जालैरिव शूकैश्चीयते, शारदो यः शरदि पच्यते, दर्दुरो दर्दुरवद् वृष्टिजीवी ॥ १४४ ॥

कुरुविन्दो यः कुरुषु लभ्यते, नन्दीमुख आटि[2]-चञ्च्वाभतण्डुलः, वरको वराटिकाकारतण्डुलः, उद्दालो वनकोद्रवाकारतण्डुलः, गन्धनः सुगन्धिः, वार्यन्तरिक्षं यद् गाङ्गं यदान्तरिक्षं गाङ्गं वारि, न तु भौमं न तु सामुद्रं, सामुद्रमपि चाश्विनमश्वयुजि गृहीतं, तत्रान्तरिक्षलक्षणम्—

"पुनर्वस्वादिनक्षत्रे वारि मुञ्चति यद्रविः।
क्ष्मामप्राप्तं गृहीतं तदान्तरिक्षमुदाहृतम् ॥ इति ॥

गाङ्गसामुद्रलक्षणम्—

"येनाभिवृष्टममलं शाल्यन्नं राजते स्थितम्।
अक्लिन्नमविवर्णञ्च तत्तोयं गाङ्गमन्यथा ॥
सामुद्रं तन्न पातव्यं मासादाश्वयुजादृते" । इति ॥ १४५ ॥

भौमं देशे सित इत्यादि। सितादिदेशस्थमिन्द्वादिस्पृष्टम्। यद्भौममपि सिते श्वेतमृत्तिके भूभागे, कृष्णे कृष्णमृत्तिके, नीले नीलमृत्तिके, साधारणे जाङ्गलानूपसाधारणे उक्तञ्च—

"देशोऽल्पवारिद्रुनगो जाङ्गलः स्वल्परोगदः।
आनूपो विपरीतोऽस्मात् समः साधारणः स्मृतः ॥ इति

१. यः प्रचुरोदके दीर्यते[2]
२. आटी[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शुचौ निर्मले, पृथौ विस्तीर्णे। इन्द्वर्कपवनैः स्पृष्टं चन्द्र-सूर्य-वायुभिर्यथाकालं सम्बद्धं, यदरसं यदव्यक्तरसम् ॥ १४६ ॥

यदूर्ध्वं यत्पर्वतोपरि स्थितम्, यच्छारदं शरदृतुसम्बन्धादुत्पन्नातिशयम्, यत्पारियात्रनदीभवं, यत्स्वादु कौपम्, मधुररसं कूपस्थं यत्, यत्पादशेषं क्वथनेनावशेषितचतुर्थांशं, यच्छृतशीतलं क्वथितशीतलम् ॥ १४७ ॥

यत्तप्तमृदादिनोष्णीकृतम्। तत्र मृत् मृत्तिका, जतु लाक्षा, स्वर्णं सुवर्णं, रूप्यं रजतं, अश्मा पाषाणः, अर्काश्मानः सूर्याश्मानः, धारोष्णदुग्धं धारोष्णक्षीरम्, दधि तु धात्रीयुगामलकयुक्तं दधि, पाकिमं मधु पक्वं मधु, पाकश्चाग्निसंयोगात् चिरकालावस्थानादित्येके ॥ १४८ ॥

स्त्र्यजाक्षीरादि नारीछाग्योः दुग्धादि घृतान्तम्, जीर्णाज्यं पुराणं घृतम्, तल्लक्षणम्—

"उग्रगन्धं पुराणं स्याद् दशवर्षस्थितं घृतम्।
लाक्षारसनिभं शीतं प्रपुराणमतः परम् ॥"

घृतमण्डः सर्पिषः ऊर्ध्वभागः, कृतो रसः पटुकट्वम्लस्नेहादिसंस्कृतो मांसरसः, शूल्यामिषं शूलप्रोतपाचितम्, भक्तमण्डः शालितण्डुलनिःक्वाथः, तैलं यद्यावतिक्तकम् यवक्षेत्रजा तिक्ता सप्ताष्टपत्रा तस्यास्तैलम् ॥ १४९ ॥

स्नेहादिभिर्मिलितैः संस्कृतो मन्थः (सक्तवः), तत्र स्नेहो घृतादिः, मधु माक्षिकम्, द्राक्षा गोस्तनी, इक्षुरस इक्षुनिर्यासः, अम्लो दाडिमरसादिः, सिता शर्करा, गुड इक्षोर्विकारः. यूषश्चामलकदाडिमैः धात्रीफलैः दाडिमफलैश्च मिलितैः संस्कृतो यूषो मुद्गकृत इति शेषः ॥ लावतित्तिरी विष्किरविशेषौ ॥ १५० ॥

हरिणस्ताम्रमृगः, एणः कृष्णमृगः, न्यङ्कुर्महामृगः, खड्गो गण्डकाख्यः, शल्यको वज्रशल्यको बृहद्गोधातुल्यो बिलेशयः। मृगमातृकोऽल्पः पृथूदरो मृगविशेषः, "स्वल्पः पृथूदरो ज्ञेयः शशाभो मृगमातृकः" इत्युक्तः। एतत्सर्वं दोषत्रयहरम्। दधि सक्षौद्रं मधु मधुमिश्रं दधि, हिमाम्भो हिमोदकं, हिमं यदन्तरिक्षात्पत्रादौ स्फटिकोपलाभं पतति। रागखाडवः सुश्रुतोक्तः "स तु दाडिममृद्वीकायुक्तः स्याद्रागखाडव" इति। एतत्त्रयं दोषत्रयोदासीनम् ॥ १५१ ॥

॥ इति वोपदेवीये सिद्धमन्त्रप्रकाशे दोषघ्नवर्गः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

।। अथ दोषलवर्गः ।।

वातलं तिलजं शाकं मोचकं काष्ठपाटला ।
कुलमाषो मन्दजं तक्रं रूक्षं दध्यरसं फलम् ।। १५२ ।।
रुणेयकफलं त्वल्पकफपित्तं च वातलम् ।
पित्तलं तु फलं शम्याः मांसं तैलविपाचितम् ।। १५३ ।।
व्रीहिश्च महदाद्यन्यः चौराड्याम्भः पित्तलाकफम् ।
श्लेष्मलं शाल्मलीवेष्टबन्धूकार्द्रकणोषणाम् ।। १५४ ।।
कुलेवर.[1] क्षौद्रशीर्षपेयासंयावपायसाः ।।
कूचिकादिकृताः भक्ष्याः श्लेष्मलाः नातिपित्तलाः ।। १५५ ।।
वातपित्तकरं बालमाम्रं भक्ष्या विरुढजाः ।
तद्वद श्लेष्मलश्चामकपित्थं वंशजोऽङ्कुरः ।। १५६ ।।
प्रोक्ता यवसुरा किञ्चित् कफला वातपित्तला
वातश्लेष्मकरं शाकं यष्टीग्गुग्गुलुसूप्यजम् ।। १५७ ।।
नालकं[2] शालिकल्याणी[3] चञ्चुपर्णीकुबेरकम्[4] ।
यवशाकञ्च कूष्माण्डनाडीजं सगवेधुकम् ।। १५८ ।।
फलं तिंदिणचीनाकपुत्रजीवकुकुण्डजम्[5] ।
तद्वत्पित्तकरी किंचिद् यातुका ससुवर्चला ।। १५९ ।।

---

१. कुलेबरं[2]
२. नासिक[1]
३. शाककल्याणी [2, 3]
४. कुबेरजम्
५. कुकूडकम्[2], कुरंडकम्[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कफपित्तकरं त्वाम्रं बद्धास्थि नलिनीजलम् ।
कालाम्लासुतशाण्डाकी शष्कुल्यो[1] रागखाडवौ ॥ १६० ॥
प्रदिग्धमांसं पिष्टोत्था भक्ष्या यवकहायनौ ।
नैषधपांशुवाप्याद्याः तद्वत्तैलं कुसुम्भजम् ॥ १६१ ॥
कफपित्तकरं चोर्वीछत्राकं चाल्पवातलम् ।
दोषलं सार्षपं शाकं ज्योतिष्मत्याः कुठिंजरः ॥ १६२ ॥
छत्राकचुञ्चुलोणीका वृद्धार्द्रामश्च मूलकम् ।
तिलपिण्याकविकृतिः शुष्कशाकं विरूढकम् ॥ १६३ ॥
शाण्डाकीवटकान्यामं मधु मन्दाविकं दधि ।
फाणितं बिल्वलकुचे पक्वे काणकपोतकः ॥ १६४ ॥
भेदासी[2] चिलिचीमश्च वृद्धशुष्ककृशामिषम् ।
पिण्याकः पाटलाव्रीहिः मेदोमज्जावसा पुनः ॥ १६५ ॥
कुम्भीरहस्तिमहिषवारटा[3]काकमुद्गजाः ।
पिण्याकाम्लाशिनी - बालवत्साऽवत्सापयो जलम् ॥ १६६ ॥
शृतशीतोषितं नष्टं[4] पल्वलोखाबिधवप्रगम् ।
बवकसः कौहली मद्यं शिष्टनष्टनवोषितम् ॥ १६७ ॥

॥ इति दोषलवर्गः ॥

प्र०—तिलजं शाकं तिलपुष्पशाकम्, मोचकं कदलीफलं, काष्ठपाटला पुष्पहीना पाटला, कुल्माषोऽर्धस्विन्नयवादिधान्यम्, यवपिष्टमुष्णोदकसिक्तमीषत् स्विन्नं मृदितं मण्डादिप्रकारमित्येके। मन्दजं तक्रं मन्ददधिजातं तक्रं, रूक्षं दधि उद्धृतस्नेहं दधि, अरसं फलमुद्धृतमांसं, एतत्सप्तकं वातलं वातकरम् ॥ १५२ ॥

---

१. शक्कुली[1]
२. भेकाशी[2]
३. वारड़ा[2], वारडो[3]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रुणेयकफलं कारंथफलम् वातकरं किञ्चित्पित्तश्लेष्मकरञ्च। फलं शम्याः शमीफलं मांसं तैलविपाचितं तैलसिद्धं मासम् ॥ १५३ ॥

व्रीहिश्च महदाद्यन्यः महदादिगन्धनान्तेभ्यो व्रीहिभ्योऽन्यो व्रीहिः। एतत्त्रयं पित्तकरम्। चुण्डी स्वयंशीर्णशिलाश्वभ्रं, तद्भवमुदकं पित्तकरं श्लेष्मोदासीनञ्च। शाल्म ·िवेष्टो मोचरसः, बन्धूको बन्धुजीवकः, आर्द्रकणोषणं आर्द्रपिप्पली, आर्द्रमरिचम् ॥ १५४ ॥

कुलेवरः छत्राकभेदः खुडखुडकाख्य[1]श्च; क्षौद्रशीर्षो मधुमस्तको भक्ष्यः, तल्लक्षणम्—

घृतेन मर्दितां तोयैः समितां मृदु मर्दयेत्।
मातुलुङ्गत्वचाखण्डपक्वान्नार्द्रकपूरिताम् ॥
कृत्वा पूपलिकं वृत्तं गन्धाढयं केशरान्वितम्।
पक्त्वा सर्पिषि खण्डावगाहितो मधुशीर्षकः ॥ इति।

पेया ससिक्थः शालितण्डुलनिष्क्वाथः। संयावः—

"समितामम्बुदुग्धेन मर्दयित्वा सुशोभनम्।
पचेत् घृतोत्तरे खण्डे क्षिपेद् भाण्डे नवे ततः ॥
संयावोऽसौ युतश्चूर्णैश्चपलामरिचार्द्रकैः। इत्युक्तः।

पायसः क्षैरेयी, एतत्सर्वं कफकरम्। कूचिकादिभिः क्षीरविकारैः कृताः भक्ष्याः कफकराः कञ्चित्पित्तकराश्च ॥ १५५ ॥

बालमाम्रं कोमलं चूतफलं, भक्ष्याः विरूढजा विरूढैरङ्कुरितधान्यैः कृता भक्ष्याः। एतद्द्वयं वातलं पितलञ्च। आमं कपित्थं कोमलं कपित्थफलम्, वंशजोऽङ्कुरः वेणोः करीरः। एतद्द्वयं वातपित्तकरं श्लेष्मोदासीनञ्च ॥ १५६ ॥

यवपिष्टकृता सुरा वातपित्तकरी किञ्चित्श्लेष्मकरी च। यष्ट्यादिगवेधुकान्तं शाकम्। तत्र यष्टी यष्टीमधु, गुग्गुलुर्महिषाक्षः सूप्या मुद्गादयः ॥ १५७ ॥

नालकं नालिकाकारं, शालिकल्याणी शालिञ्चिका, चञ्चुपर्णी चञ्चुसदृशपत्रा, कुबेरको नन्दीवृक्षः, यवशाकं यवमध्यचिल्लीसदृशमहापत्रम्, कूष्माण्डं कुम्भफलं तस्य नाडी, गवेधुका कपिला ॥१५८॥

---

१. खुखुण्डाख्य.[२]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तिंदिशादिचतुष्टयं फलम्। तत्र तिंदिशं छाटकम्, चीनाकं दीर्घमण्डपवल्लीफलं, पुत्रजीवं प्रसिद्धम्, कुकुण्डञ्च एतत्सर्वं वातश्लेष्मकरम्। यातुका केश (शुक्लपृ इन[2]) पर्णी, सुवर्चला आदित्यभक्ता, एषा द्वयी वातश्लेष्मकरी किञ्चित्पित्तला च ॥ १५९ ॥

आम्रं बद्धास्थि मध्यावस्थं चूतफलम्, नलिनीजलं पुष्करिणीतोयं, कालाम्लासुतशाण्डाकी कालाम्लासुता चिरकालावस्थानेनाम्लीभूता आसुता शाण्डाकी—

"स्विन्नं क्षुण्णं मूलकादिसुगन्धिकटुकान्वितम्।
वटकीकृत्य कुर्वन्ति शाण्डाकीं सुहिताशिनः ॥" इत्युक्ता।

आदिशब्देन मुद्गादिग्रहणम्। उक्तं ह्यन्यत्र—
शाण्डाकी कन्दमूलादिमुद्गादिवटकैः कृता इति।
शाकशिक्यमण्डासुतिः शाण्डाकीत्येके। "मूलकन्दकसंधानं शाण्डाकी स्याद् बहुद्रवे" ति तद्विशेषः।

शष्कुली[1] नलेनोक्ता—

"शालूकबीजसंयुक्तैः शालिकोद्रवतण्डुलैः।
सुपिष्टैस्तिलसंयुक्तैस्तैलभृष्टैस्तु शष्कुली" ॥ इति।

रागखाडवौ व्यञ्जनविशेषौ। तयोर्लक्षणम्—

"सितामध्वादिमधुरा रागास्तत्राच्छकान्तयः।
ते साम्लाः खाडवा लेह्याः पेया चांशुकगलिता" ॥ इति।

आदिशब्दादन्येषां कपित्थादीनां ग्रहणम्। मधुरा मधुरप्रायाः। उक्तं ह्यन्यत्र—

"स्वाद्वम्ललवणो राग ईषत्स्वादुरसैः फलैः।
कपित्थादियुतो गन्धवर्णवैशद्यसंयुतः ॥" इति।

लेह्या पेया वेति रागाणां द्वैविध्यम्। उक्तं हि—

"कपित्थमध्यमृद्वीकागुडकृष्णा[2] म्लदाडिमैः।
शर्करातिलचूर्णैश्च सुपिष्टैः सुप्रयोजितः ॥
धान्यसौवर्चलाजाजीराजिकामरिचान्वितः।
त्रिजातककृतामोदो लेह्यो रागः प्रकीर्तितः ॥" इति।

---

१. शवकुली[1] २. वृक्षा[1]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तथा—

सितारुचकसिन्धूत्थैः सवृक्षाम्लपरुषकैः ।
जम्बूफलरसैर्युक्तो रागो राजिकयान्वितः ॥"

पेयरागोऽयम् । रागा एव साम्लाः खाडवाः, ते च मधुराम्लप्रायाः । उक्तं हि—

"स्पष्टाम्लमधुरो स्पष्टकषायलवणोषणः ।
अतिक्तः खाडवः कोलकपित्थैरुपबृंहितः" ॥ इति ॥

तेऽपि लेह्यपेयभेदाद् द्विविधाः । उक्तं च—

"साधितं सगुडं पक्वं सहकारफलं मधु ।
तैलनागरसंयुक्तं विज्ञेयो घनखाडवः ॥"
कपित्थतित्तिडीकाम्लबीजपूरकदाडिमम् ।
पूतोष्णमिक्षुसारेण योजितः स्वच्छखाडवः ॥" इति ॥१६०॥

प्रदिग्धं मांसं सुश्रुतोक्तम्—

"पक्वं बहुघृते मिश्रं महुरुष्णाम्बुना मृदु ।
जीरकाद्यैर्युतं मांसं परिशुष्कं तदुच्यते ॥
तदेव गोरसादानं प्रदिग्धमिति विश्रुतम् ।" इति

पिष्टोत्थाः भक्ष्याः शाल्यादिपिष्टकृताः भक्ष्याः, यवकादयः शालयः । तत्र यवको यवाकारतण्डुलः, हायनश्चिरपाकी, नैषधो निषधदेशजः, पांशुवाप्यो यो धूले (पांशुभूमौ[२]) वाप्यते, आदिशब्दादन्येऽप्येवंविधाः । एतत्सर्वं श्लेष्मपित्तकरम् । कुसुम्भजं तैलं कफपित्तलं वातोदासीनञ्च ॥ १६१ ॥

उर्वीछत्राकं भूमिजं छत्राकं (कवकं[२]), भूमिजमिति करीषादिव्युदासार्थं, कफपित्तलं किंचिद् वातकरञ्च । सार्षपं शाकं सर्षपपत्रादिशाकम्, ज्योतिष्मत्याः कङ्गुणिकायाः शाकं, कुठिञ्जरः कुञ्जरः (बर्बरकम्[२]) ॥ १६२ ॥

छत्राकं कुकुण्डकम् , लोणीका घोलिका, वृद्धार्द्रामञ्च, मूलकम् वृद्धं जरठं आर्द्रं सरसं आममनग्निपक्वं न तु बालं, तस्य दोषघ्नत्वादिति ।

तिलपिण्याकविकृतिः तिलविकृतिर्मोदकादिः पिण्याकस्तिलपीडितयन्त्रकिट्टं तस्य विकृतिर्वटकादिः, शुष्कशाकं वार्ताकादि, विरुढकमङ्कुरितधान्यम् , विगतरोहमसम्यक्रूढं जातमात्रमित्येके ॥ १६३ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शाण्डाकीवटकानि यैर्वटकैः शाण्डाकी निष्पाद्यते, आमं मधु अपक्वं मधु, मन्दाविकं दधि मन्दमसम्यग् जातं दधि, आविकं मेषीक्षीरजं दधि, द्वन्द्वैकवद्भावादेकवचनम्। फाणितं समल इक्षुविकार; बिल्वलकुचे पक्वे, बिल्वं मालूरं, लकुचं लकुचफलं, काणकपोतो ह्रस्वारुणः कपोतभेदः॥ १६४॥

भेदासी पत्रवासी लघुः शुकभेदः पत्रशुकाख्यः। चिलिचीमो मत्स्यभेदः। तस्य लक्षणम्—

"शकली रक्तनयनो रक्तराजिश्च सर्वतः।
प्रायश्चरति यो भूमौ स तु मत्स्यश्चिलचिम:" ॥ इति

वृद्धशुष्ककृशामिषम् वृद्धं जराव्याप्तमृगादिजं, शुष्कमनार्द्रं कृशं क्षीणधातुमृगादिजम्, पिण्याको व्याख्यातः, पाटला पाटलापुष्पाभो व्रीहिः॥ १६५॥

कुम्भीरादिजाता मेदोमज्जवसाः। तत्र कुम्भीरः पादिजलेशयभेदः हस्ती गजः, महिषोऽश्वारिः, वारटा विष्किरभेदः, काको वायस, मद्गुर्जलकाकः, पिण्याकाम्लाशिन्यादीनां पयः क्षीरम्। तत्र पिण्याकाशिनी तैलकिट्टभक्ष्या, अम्लाशिनी भाण्डलेपादिसन्धानभक्ष्या, बालवत्सा पयोमात्रवृत्तिवत्सा, अवत्सा वत्सेन विना दुह्यमाना, असमानाविशुद्धया म्रियमाणवत्सा च। श्तृशीतोषितादिवप्रगान्तं जलम्॥ १६६॥

तत्र श्तृतशीतोषितं क्वथितशीतं सद्रात्रिमुषितम्, नष्टं विकृतगन्धवर्णरसस्पर्शम्, पल्वलगमल्पसरःस्थम्, उखागम्, अब्धिगं समुद्रगं, वप्रगं केदारस्थं। बक्कसः शुष्कार्द्रो मद्यावयवः। उक्तं च—

"किण्वं बक्कसमेदकजगलाः कादम्बरीप्रसन्ने च।
शुष्कसमार्द्राः सार्द्राः समद्रवाः क्रमोर्ध्वगा मद्ये"॥ इति

समोऽत्र पूर्वोत्तरावस्थासाधारणः। कौहली यवसक्तुसुरा, भक्तसुरेत्येके। शिष्टनष्टनवोषितं मद्यम्, शिष्टं अवशिष्टं किञ्चिच्छेषं, नष्टं किञ्चिद्विकृतरसादि, नवमनतीतवत्सरम्, जातमात्रमित्येके; उषितं सन्धानपात्रादुद्धृत्य पात्रान्तरस्थापितम। एतत्सर्वं दोषत्रयजनकम्॥ १६७॥

॥ इति वोपदेवीये सिद्धमन्त्रप्रकाशे दोषलवर्गः॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

न सिद्धः सिद्धमन्त्रेऽत्र यस्य द्रव्यस्य निर्णयः ॥
तस्य नान्यत्र कुत्रापीत्यत्र चित्रमधीमताम् ॥१६८॥

लेभे जन्म महादेवादायुर्वेदञ्च भास्करात् ।
सम्मानं सिंहराजाद्यः[2] केशवः कारकोऽस्य सः ॥१६९॥

। इति केशववैद्याचार्यविरचितः सिद्धमन्त्रः समाप्तः ।

●

प्र०—एवं निर्णीतनिःशेषभेषजशक्तितत्त्वेऽप्यत्र ग्रन्थे संक्षिप्तत्वाद् सम्पूर्णत्वशंका मा भूदिति सालङ्कारमाह—अस्मिन् सिद्धमन्त्रग्रन्थे यस्य द्रव्यस्य निर्णयः शक्तिनिर्धारो न सिद्धः न सम्यक् जातः तस्य द्रव्यस्यान्यस्मिन् ग्रन्थे क्वचिदपि न सेत्स्यति । यद्यप्यानन्त्याद् द्रव्याणि कार्त्स्न्येन वक्तुमशक्यानि तथापि यावन्ति प्राचीनेषु ग्रन्थेषु लब्धानि तावन्ति निर्णीतानीत्यर्थः। अत्र विषये अधीमतां बुद्धिविहीनानां चित्रं कथमीदृशेनातिसंक्षिप्तेन ग्रन्थेन तादृग्विस्तीर्णचरकादिशास्त्रोक्तसमग्रद्रव्यनिर्णय इत्यनुपपत्तिगर्भो विस्मयः, न तु बुद्धिमताम् ।

जानन्ति ह्यमी यदस्ति क्वापि विदुषि कोऽप्यतिशय इति । उक्तञ्च रुद्रभट्टेन[3]—

सानन्दं प्रमदाकटाक्षविशिखैर्येषां न भिन्नं मनो
यैः संसारसमुद्रपातविधुरेष्वन्येषु पोतायितम् ।
यैर्निर्वारसरस्वतीविलसितं द्वित्रैः पदैः संहृतम्
तेषामप्युपरि स्फुरन्ति मतयः कस्यापि पुण्यात्मनः ॥ इति ॥

अथ ग्रन्थकृच्छ्रोतृणामादरार्थमात्मानं ख्यापयति । अस्य सिद्धमन्त्रस्य केशवनामा भिषक्कारकः कर्ता; यो महादेवाज्जन्म लेभे लब्धवान् । महादेवशब्दत्वाच्च महादेवो वेद (देव) पदाभिधान-

१. मन्त्रेण[1]
२. सिंहराजाच्च[1]
३. रुद्रटेण[2]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

महाराष्ट्र[1]निवासी विप्र इति शेषः। अथवानेकजन्माराधनसन्तुष्टान्महादेवादीदृक् परोकारकं[2] जन्म लेभे। यश्च भास्करादायुर्वेदं लेभे। भास्करशब्दवाच्यत्वात् भास्करशब्दत्वाच्च भास्करो वेदपुरारण्यश्रीमद्राजधानीनिवासी विप्र इति शेषः[3]। अथवानेकजन्माराधनसन्तुष्टाद् भास्करदेवादीदृशं परोपकारक्षममायुर्वेदं लेभे। यः सिंहराजात् सम्मानं सम्यक्पूजां लेभे लब्धवान्। सिंहराजशब्दवाच्यत्वात् सिंहानां राजा यः सिंहस्तत्सदृशाच्च शत्रूणामिति। सिंहराजो दण्डकराष्ट्राधिपो राजविशेषः। अथवानेकजन्माराधनसंतुष्टात्सिंहराजान्नरसिंहमूर्त्तिदेवात्सर्वतः सम्मानं लेभे।

धनेशाध्यापितो वेद[4]पदौकाः पितृकर्तृकम्।
सिद्धमन्त्रं विवृतवान् वोपदेवः सतां मुदे॥

॥ इति वोपदेवविरचितः सिद्धमन्त्रप्रकाशः समाप्तः[5] ॥

—: *:* :—

१. महाग्रहार[2]
२. क्षमं[2]
३. भास्कराचलपुरनिवासो तद्राजधानीकराजमान्यो विप्रविशेषः[2]
४. देव[2]
५. इतिश्रीवोपदेवपण्डितविरचिते सिद्धमन्त्रप्रकाशे भिषक्केशवपण्डितविरचित सिद्धमन्त्रप्रबोधः समाप्तिमगमत्[2]
इति श्रीमद्वोपदेवीयः सिद्धमन्त्रप्रकाशः समाप्तः[5]

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सम्पादक–परिचयः

विहारगे पाटलिपुत्रमण्डले
खगोलपार्श्वस्थितमुस्तफापुरे ।
सुजन्म संप्राप्तमनेकपण्डितैः
यशस्विवैद्यैश्च विमण्डिते कुले ॥ १ ॥

विप्रावंतसमगवंशविभूषणोऽसौ
रामावतारविदितो भिषगद्वितीयः ।
धन्वन्तरिप्रतिभटो भुवि राजते स्म
तत्र प्रचण्डयशसा महसा च मित्रः ॥ २ ॥

वाग्देवतार्चनप्रियव्रतचञ्चरीको
रामावतारभिषजस्तनयो द्वितीयः ।
यस्याग्रजोऽस्ति सुजनः सुधियां वदान्यः
सत्यव्रतः सुकविकैरवकाननेन्दुः ॥ ३ ॥

श्रीसत्यनारायणशास्त्रिवर्यो
वैद्यश्च राजेश्वरदत्तशास्त्री ।
तयो र्गुरूणां महतां तु गुर्वोः
गीर्भिर्गिरां गौरवमादधानः ॥ ४ ॥

साहित्यशास्त्ररसिको भिषजां वरेण्यः
काश्यामधीतसकलोभयवैद्यविद्यः ।
अध्यापन्ननुसरन्नथ विश्वपूर्वे,
विद्यालये वसति हिन्दुपुरःसरेऽस्मिन् ॥ ५ ॥

क्रमेण कालोपहताः निघण्टव-
स्तिरोगताः द्रव्यगुणाकरास्तथा ।
पुनः समुद्धर्तुमिहैष तान् मुदा,
प्रियं व्रतं धारयति प्रियव्रतः ॥ ६ ॥

आशुतोषप्रसादेन जगदम्बानुकम्पया ।
व्रतः सारस्वतोऽयं मे साफल्यं समवाप्नुयात् ॥ ७ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

द्रव्यानुक्रमणी

	श्लोकसंख्या
अ	
अक्षतैल	६७
अक्षमज्जा	८७
अक्षोट	१६
अक्षोटतैल	६७
अगस्ति	११३
अगुरु	९०
अग्निचूड	१२७
अङ्कोल	६४, १०२
अज	३०
अजगर	२७
अजाक्षीर	१४९
अञ्जन	११७
अणु	४९
अतसी	१८
अतिमुक्ततैल	६७
अतिमुक्ता	१३२
अद्रिकर्णी	१३२
अपित्त कफवातघ्न	९९
अपित्तजित्	५३
अब्जिनी	१०६
अब्धिफेन	१११
अभया	१२६
अभिषुक	१६
अभ्र	१३८
अमरुत्पित्त	५३
अम्बुकुक्कुटी	७१
अम्बुकृष्णा	१३
अम्बुपर्णी	३२

	श्लोकसंख्या
अम्लगोरस	१२
अम्लदाडिम	१००
अम्लवेतस	८०
अम्लान	१३२
अम्लिकाकन्द	८३
अरण्यत्रपुस	११०
अरस फल	१५२
अरिमेद	४१
अरिष्ट	५३
अरुष्क	११३
अरुष्कर	९८
अर्क	९०, ९६, १०९
अर्कवल्ली	६७
अर्गट	१०३
अर्जक	९६
अर्जुन	१ ३
अलर्क	९०
अलाबुनालिका	३७
अल्पकफपित्त वातल	१५३
अल्पपित्तल	१०१
अवशिरफल	३४
अविवृक्ष	१०४
अशोक	१३१
अश्मघ्न	१३१
अश्मन्त	८०
अश्मन्त (फल)	८५
अश्व	२२
अश्वकन्दक	८२
अश्वकर्ण	११९

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

	श्लोकसंख्या		श्लोकसंख्या
अश्वकर्णक	४०	आरट	६०
अश्वघृत	४५क	आरा	७१
अश्वतर	२२	आरुक	१७, २८
अश्वत्थ	११७	आर्द्रक	१००
अश्वदधि	४६	आर्द्रकणा	१५४
असन	१०१, १०९	आर्द्रोषण	१५४
असनपुष्पक	१४२	आल	१११
अस्थिशृङ्खला	१३	आलुक	३७
अहि	२७	आविक दधि	१६४
आ।		आसव	४८
आक्षिक सीधु	१००	आसुरी	९४
आक्षिकी	११८	इ	
आक्षिकी सुरा	२७	इक्षुजासव	५१
आखु	२७	इक्षुभक्ष्य	६५, ६६, ८८
आखुकर्णिका	४२	इङ्गुद	४१, ९७, १३७
आघाट	८२	इन्द्रवारुणी	१०५
आज मूत्र	५४	इन्द्राभ	६०
आज्यसिद्ध	५८	इभ	१९
आटरूष	११७	इभबला	८६, १३३
आटि	७१	उ	
आढकी	१२२	उज्जाल	१४४
आनूपोदक	३६	उत्कट	५०
आन्तरिक्ष वरि	१४९	उत्क्रोश	७१
आप्य शालि	३६	उत्तमारणी	११
आम कपित्थ	१५६	उद्दाल	४९, १४५
आम मधु	१६४	उदुम्बर	१०२, ११७
आमलकयूष	११२	उद्र	७३
आमिष	१६५	उपचक्र	७९
आम्र	८६, १०२	उपोदका	६३
आम्रात	१७, ६४	उरण	७६
आरग्वध	११६, १३०	उरुमाण	१६
आरग्वधमज्जा	५७	उर्वीछत्राक	१६२

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

	श्लोकसंख्या		श्लोकसंख्या
उलूक	२४	कङ्गु	१२३
उलूकक	४५	कङ्गुक	१४३
उशीर	१३५	कङ्गुलिका	८५
उष्ट्र	२२	कच्छुरा	३१
उष्ट्रघृत	४५क	कञ्चटक	६२
उष्णसुन्दर	१२८	कटमी	४१
उष्णाम्भः	८८	कटुका	११३
ऊ		कट्तृण	१०६
ऊषक्षार	९४	कट्फल	७९
ऋ		कठिल्लक	११५
ऋक्ष	२३, ७६	कणा	१००
ऋद्धि	६२	कण्टाली	९०
ऋषभक	६२	कतक	१०४
ए		कदम्ब	४१
एकैषिकातैल	३८	कदली	२६, ३१
एण	१५१	कदलीकन्द	१२९
एरण्ड	८१, ११६	कपर्दक	७४
एरण्डतैल	८९	कपिकच्छू	१६, ५५
एर्वारु	३८, ६८, ९३ १०७	कपिञ्जल	१२९
एला	९४	कपित्थ	१३७
एलान	१७, ३०	कफघ्न	४०
ऐ		कफघ्न अल्पवातपित्त	५२
ऐरावती	११	कफघ्न अल्पवातपित्तकर	५४
ओ		कफघ्न पित्तल	४६
ओतु	२३	कफघ्न पित्तलावात	५२
ओदन	४५	कफघ्न पित्तवातकर	४७
औद्दाल मधु	५२	कफघ्न वातकर नातिपित्तल	५३, १५७
औद्भिद जल	५९	कफघ्न वातल	४६
क		कफघ्न वातलापित्त	४९
कङ्क	२४	कफपित्तकर	१६०
कङ्कत	१३३	कफपित्तकर अल्पवातल	१३०, १६२
कङ्कोल	८३	कफानिलघ्न	७९

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

	श्लोकसंख्या		श्लोकसंख्या
कफपित्तघ्न अवातल	१२९	काककुष्ठक	४४
कफपित्तहर	१०१	काकजंघा	१०६
कम्पिल्ल	६८, १०३, ११५	काकतुण्ड	७०
करञ्ज	१६, ८१, ६६, १०३	काकतुण्डी	४२
करञ्जी	११३	काकुली मृग	२५
करकातोय	३९	काकोदुम्बरिका	१०४
करमीक्षीर	८८	काकोलीद्वय	६२
करमर्दक	६४	काचाक्ष	७२
करमर्दी	८०	काञ्चन	११७
कराल	७६	काञ्चनक	१४२
कराम्लक	१७, ५७	काञ्जिक	९५
करीर	८०, ११६, १२८	काणकपोत	१६४
करुण	९०	काण्डीर	९१
कर्कट	७३	कादम्ब	६९
कर्कटाह्वा	८५	कामाता	१३३
कर्कारु	३८, ६८, ९३	काम्बलिक	१५, ८९, ९६
कर्कोट	१२८	कारण्डव	६९
कर्णिकारिका	४१	का एवल्ली	१०५
कर्चूर	८३	कारवेल्ल	१२८
कर्दम	१४०	कारेणव दधि	८८
कर्पर	१२७	कार्पासी	१०
कर्पूर	४४	कालक	१४३
कलम	१३९	कालपुच्छ	७७
कलम्बु	११५	कालशाक	८३
कलम्बुका	६२	कालिङ्ग	३८, ६८, ९३
कलविङ्क	१२७	कालाञ्जनी	८४
कलाय	११६	काल्यक	११५
कलायक	१२१	काश	११
कसेरुक	३७	काश्मरी	१३०
कस्तूरिका	४३	काश्मर्य	७५, ११६
कांस्य	११०	काश्मर्यतैल	११२
काक	१६६	काष्ठपाटला	१५२

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

	श्लोकसंख्या		श्लोकसंख्या
काष्ठेक्षु	३७	कुरंग	७६
कासघ्न	१३३	कुरंगलेण्डिक	३०
कासीस	८७, १००	कुलत्थ	६५
किङ्किरात	१०३	कुलत्थयूष	३०, ८९
किञ्चित् पित्तकर	१५६	कुलत्थी	४४
किणिही	१३०	कुलिङ्ग	६८, १२५
किलाट	१४	कुलिश	२१
कुकुण्ड	१५६	कुलेवर	१५५
कुक्कु	६०	कुल्माष	१५२
कुक्कुट	६१, ६८	कुष्ठ	८३
कुक्कुटाण्ड	१४८	कुसुम्भ	४६, ९५
कुक्कुटी	५६	कुसुम्भ तैल	१६१
कुक्कुभ	७८	कूचिकादिकृत भक्ष्य	१५५
कुङ्कुम	१३५	कूचिकामस्तु	८६
कुचैला	११४	कूची	१५
कुटज	९६, १३७	कूचीक	२६
कुठिञ्जर	१६२	कूपाम्बु	१२३
कुतित्तिरि	७६	कूर्चपर्णी	१०५
कुतिन्दु	११३	कूर्म	७३
कुधान्य	५१	कूष्माण्ड	३५, ६८
कुन्तलो	४०	कूष्माण्डनाडी	१५८
कुन्द	१३५	कूष्माण्ड (बाल)	६५
कुन्दुरु	८७	कूष्माण्डमज्जा	३२
कुबेरक	१५८	कृतमाल	७६
कुम्भस्कृत	१२७	कृत रस	१४६
कुम्भिका	५१	कृशरा	१६
कुम्भीर	७३, १६६	कृष्ण	१४३
कुरर	२३	कृष्णमत्स्य	२०
कुरुण्ठिका	४७	केतकी	४२, १३७
कुरुबक	१४२	केदार	१४३
कुरुबाहु	७८	केम्बुक	११५
कुरुविन्द	५०, १४५	केलूट	३७

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

	श्लोकसंख्या		श्लोकसंख्या
केशरी	७२	क्षीरशाक	१४
केशव	१६९	क्षीरावी	११५
कैरात	१२७	क्षीरी	१३६
कोकिलाक्षक	१०	क्षौद्रभक्ष्य	६५
कोट्टकार	७७	क्षौद्रमधु	१२३
कोद्रव	१२३	क्षौद्रशीर्ष	१५५
कोनील	७२	क्ष्वेड	६६
कोयष्टि	१२४	ख	
कोल	१८, ५७, १००	खञ्जन	१२४
कोलतैल	६७	खड्ग	१५१
कोलमज्जा	५७	खण्ड	२६, ६५
कोविदार	१०२	खदिर	१०१
कोश	१२७	खर	२२
कोशकाली	७१	खर्जूर	६३
कोशवती	११९	खर्जूरमद्य	५३
कोशातकी	४२	खल	१५, ८६, ९६
कोशाम्र	१७, ८६, ९६, १०२	खाडव	१५१, १६०
कोशाम्रमज्जा	५७	खानिष्क	५९
कोशी	७४	ग	
कोहली	१६७	गजघृत	४५क
क्रकर	७९	गण्डदूर्वा	११५
क्रतुयष्टि	१२६	गजद्रुम	११३
क्रौञ्च	७२	गन्धन	१४५
क्रौञ्चादन	३२	गम्भीर	६९
क्षण	११७	गन्धक	९४
क्षव	९०	गर्गर	२१
क्षार	४६	गर्दभाण्ड	११८
क्षारकूपाम्बु	६५	गर्दभाण्डक	१०२
क्षीर	६६	गर्मोती	५१
क्षीरपलाण्डु	६२	गवय	६८
क्षीरमक्ष	६५	गवेधुका	४९, १५८
क्षीरमोरट	१०५	गाङ्ग वारि	१४५

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

	श्लोकसंख्या		श्लोकसंख्या
गिरिपादिका	१५	**घ**	
गिरिवर्त्तिका	६०	घनाराव	७१
गिरिशा	१२४	घृत	६६
गुग्गुलु	८१, १५७	घूर्णपादी	४६
गुञ्जा	१०५	घृतपूरक	६५
गुड	७५	घृतमण्ड	१४६
गुडज भक्ष्य	१४	घृतसिद्ध मांस	३४
गुडसट्टक	६५	घोल	५६
